पालिजातकावलि

श्री वटुकनाथशर्मा, एम० ए०
साहित्योपाध्यायः

'Master' Manimala series No. 139 (Sahitya sec. 6)

PALI JATAKAVALI

(A SELECTION FROM PALI JATAKAS.)

EDITED WITH
A Critical Introduction, Sanskrit Chhaya,
Hindi Translation, A Synopsis of
Grammar and A Full Pali
Glossary

BY

PANDIT BATUKNATH SHARMA, M. A.,
SAHITYOPADHYAYA,
Head of the Sanskrit Department,
Banaras Hindu University
Varanasi.

PUBLISHED BY
MASTER KHELARILAL & SONS,
SANSKRIT BOOK DEPOT
Kachauri Gali Varanasi-1.

'मास्टर' मणिमालायाः १३९ संख्यको मणिः (साहित्यविभागे ६)

❀ श्रीः ❀

पालिजातकावलिः

काशीस्थ-हिन्दूविश्वविद्यालयीय-संस्कृतविभागाध्यक्षेण, साहित्यो-पाध्यायपदवीभृता, एम्० ए० इत्युपाधिधारिणा,

श्रीबटुकनाथशर्म्मविरचितया

संस्कृतच्छायया ऽलङ्कृता ।

तेनैव निर्मितैर्भाषानुवाद-पालिव्याकरणसंक्षेप-पालिपाठ-पदोच्चयादिभिः समुद्भासिता ।

सा च

वाराणसेय-'संस्कृत-बुकडिपो'ऽध्यक्षवरेण्यैः

मास्टर खेलाड़ीलाल ऐण्ड सन्स इत्येतैः

'हितचिन्तक प्रेस' नाम्नि मुद्रणागारे

सम्मुद्राप्य प्रकाशिता ।

मूल्यम् ३·५०

अनुक्रमणिका

प्राक्कथनम्

स्मृताऽपि मानसोल्लासं तनुते सहसैव या ।
सा सदालोकदा काचित् स्याच्चिदानन्दचन्द्रिका ॥

इयमद्य पालिजातकावलिर्यथामति सम्पाद्य नीयते नयनगोचरतां विशद-शेमुषीजुषां विदुषाम् । इदमनु किमपि परिचाययितुमिव निवेदयेयमिति मतिं विधाय प्रवृत्तोऽहमिदं प्राक्कथनं लेखितुम् । यावदन्यद् गदितुं समुपक्रमे तावदादौ कथयामि कथमयमहं सम्पादनभारममुमूरीकर्तुमपारयम् । एतदर्थं प्रार्थितोऽभूवं मदन्यतमेन च्छात्रेण श्रीमताऽऽयुष्मता मन्नालालेन । कारणैरनेकैः समुदितैः संप्रति मे दुष्करमेव भवति स्वल्पमपि किमपि कार्यजातम् । अवश्यकर्तव्यतयाऽऽपतितेषु बहुविधाध्ययनाध्यापनादिकार्येषु व्यासक्तचित्तत्वात् तन्मे दुष्करतरत्वमेवोपपद्यते । तदस्मिन्नेवमुपस्थिते दुःस्थे व्यतिकरे, सत्य-मेवान्वभावि किमपि विचित्रं दोलाधिरोहणसुखं ममान्तःकरणेन । यदि नोरी-करोमि तदर्थितम्, विहन्यते प्रियशिष्यप्रणयः । अथाङ्गीकरोमि चेत् , समासाद्यते महानायासः । किमत्र कर्तुं युक्तं स्यादिति चेतसि विचिन्तयता मया प्रसङ्गा-दुक्तोऽयं विषयो मदन्तेवासिने चिरञ्जीविने श्रीरामशङ्करमिश्राय । परमसंमद-मगमन्मदीयं हृदयं यदाऽनेन सत्यपि निजे महत्यध्ययनीये विषये प्रतिश्रुतं मह्यमावश्यकं साहाय्यकम् । इतः परमपि दैवेनानुकूल्यमुल्लासितम् । असकृ-दनुभूतचरमेवेदं यदतीव चक्षुरुत्क्षोभयति सूक्ष्माक्षरसंशोधनकार्यम् । तदिदं ममाङ्गुलिनिदर्शनेनेव निदेशेन यथाशक्ति समनुष्ठितं श्रीमन्नालालेन । इत्थं

शिष्यद्वयसाहाय्यसमुद्भूतं सौभाग्यं स्वयमेव समुपनतं समुद्वीक्ष्य सहर्षमहमस्मिन् प्रयासविषमेऽपि कार्ये सोत्साहं प्रावर्तिषि।

अस्यां पालिजातकावल्यां प्रथमं स्वल्पविस्तरा प्रस्तावना समुपन्यस्ता। अतिविस्तरोऽयं विषयः। समालोचनीयोऽत्र बहुविधोऽर्थसार्थः। किन्तु परिचयावस्थायां पालिसाहित्यप्रविविक्षूणां छात्राणां नैवोपकाराय भवेदतिपृथुलाकारा भूमिका काऽपीति मनसि विभाव्य परमप्रयोजनीयानामेव विषयानामत्र मया संनिवेशो विहितः। कथांशः सुखेनावबुद्धः स्यादिति कथासंक्षेपः स्वल्पैरेवाक्षरैर्विलिख्य प्रथममेवाऽत्र निहितः। तदनन्तरं दक्षिणपार्श्वे पालिपाठो वामपार्श्वे तत्संस्कृतच्छाया इति क्रमेण विंशतिर्जातककथा दत्ताः। संस्कृतच्छाया छात्राणां महोपकाराय भविष्यतीति भृशमाशासे। अत्रेदमवधेयम्। नाऽत्र शब्दसौष्ठवमधिष्ठाय संस्कृतं लिखितम्। शिथिलप्रायमेवाऽत्र सन्धिबन्धनम्। कारकादिष्वपि पालिच्छायामुच्छेत्तुं नैवाकारि बलीयानाग्रहः। यथा पालिपाठोऽनायासेनैव संस्कृतज्ञानामवबुद्धो भवेत्तथैव बहुधा विहितो यत्नः। एतदग्रे 'जातकत्थवण्णना' इति प्रसिद्धटीकातः केचनांशाः समुद्धृत्य समुपन्यस्ताः। संस्कृतच्छात्राः पश्येयुरेतैः कथमिव पालीटीकाकारा व्याख्यान्ति प्राचीनान् स्वधर्मग्रन्थानिति। अर्थस्फुटीकरणेऽपि साम्प्रदायिकमतप्रदानेनेमे बहु साहाय्यमाचरिष्यन्ति च्छात्राणाम्। तदनु भाषानुवादोऽत्र निहितः। कानिचिद् पालिवाक्यानि तत्क्षणमेवापरिचितसंघटनया न स्फुटीभवेयुरिति कथांशस्त्वरितमेव मतिपथं नावतरेदिति चाऽऽलोच्य भाषाऽनुवादोऽपि पदमत्र प्रापितः। बाढं विश्वसिमि यदयमपि हिताय सम्पत्स्यते। अनालोकितव्याकरणालोको लोको न खलु किमपि विभावयति तमसि लीन इवेति विचार्य पालिव्याकरणस्य परमोपादेया अंशा अपि तदनन्तरं समुपन्यस्ताः। अस्याखिलस्यान्ते पालिपाठपदोच्चयरूपेण पालिजातकावल्यामागतानां शब्दानां सप्रमाणार्थसार्थोपबृंहितः कोशोऽपि समुपवेशितः। इत्थमियत्प्रपञ्चचयसंचितं पुस्तकमिदं बुद्धवचनशुश्रूषूणां बोधोद्बोधाय भविष्यतीति भवति मे मनसि विश्वासावकाशः।

अस्यां पालिजातकावल्यां स्वीकृतपालिपाठमधिकृत्य स्वल्पं किमपि वक्तुं समुचितमेव। सर्वप्रथमं पालिपाठावलीं पुरोऽवस्थाप्य प्रक्रान्तमिदं कार्यम्।

किन्तु पदे पदे प्रमादस्थानानि शङ्कनीयानीत्युपलभ्य तदुपजीव्यः विद्वद्वर-'एण्डर्सन' सङ्गृहीतः 'पालि रीडर' इत्याख्योऽपि ग्रन्थः सन्निहितो व्यधायि। तत्राऽपि क्वचित् क्वचित् स्खलितमिव किमपि साशङ्कमुत्पश्यता मया 'फोसबोल' इति सुगृहीतनामधेयैः पालिमहापण्डितैः प्रकाशितः पञ्चभागात्मकः 'अत्थवण्णना' इत्याख्यया टीकया सहितः पालिजातकनिकर एव समवलम्बितः। अहो अध्यवसायः फोसबोलपण्डितस्य ! तत्कृतिः सत्यमेव चमत्करोति चेतः।

अस्या जातकावल्याः पाठादिनिर्णये तथा चान्येष्वपि विषयेषु येषां पुस्तकलेखादिभ्यः साहाय्यमासादितं तेषामुपकारं सप्रश्रयं कृतज्ञेनान्तःकरणेन पुनः पुनः स्मरामि। यथास्थानं प्रस्तावनायां च यथाशक्ति पुनरपि तेषामुपकारस्मरणं नामग्राहं यतिष्ये। यदीयसाहाय्येनेदं कार्यं सम्भावित-पदमुपनीतं तमहं चिरञ्जीविनं श्रीरामशङ्करमिश्रं कैः शब्दैरभिनन्दामि ? अयं वत्सोऽचिरादेव विद्याप्रसादमासादयेदित्येव मे श्रीमातुश्चरणयोः सप्रश्रयो-ऽनुनयः। श्रीमतो मन्नालालस्याप्युपकृतिर्नैव विस्मर्तुमर्हा। श्रीविश्वनाथोऽस्य सर्वथा कल्याणं कुर्यादित्येव मे हृदयगताऽऽशीः।

येषामुपकृतिः शब्दव्यापारेण प्रकाशयितुं नैव कदापि पार्यते तेषां श्रीगुरु-चरणानां ससमादरं सप्रश्रयं स्मरणमेवास्मादृशां शरणम्। यन्मादृशोऽप्यकिञ्चन-श्चितिचन्द्रिकाकणान् कथमपि विचेतुमलं स्यात् तत्र श्रीगुरुचरणानामनुग्रह एव सर्वप्रधानं कारणम्।

यत् प्राक्तनेष्वपि मतिर्विषयेषु मोहं
याता न मेऽपि बटुकस्य न तत्र चित्रम्।
जागर्ति मानसविषापहरोऽनिशं मे
श्रीभालचन्द्रचरणाम्बुजसंप्रसादः ॥
यो वस्तुतोऽस्ति विबुधोऽत्र महामहोपा-
ध्यायोऽभियुक्तशरणीकृतपादपद्मः।
सोऽयं सदागमसुधार्णवकर्णधारः
श्रीलक्ष्मणोऽस्तु हृदये मम पूज्यपूज्यः ॥

दीपावली, १९९७ — विदुषां वशंवदो
बटुकनाथशर्मा

किमपि प्रास्ताविकम्

प्रवर्तन्तेऽवतारास्ते यत्कारङ्गुलितो दश ।
सा मे मतिबलं दद्यादपि दाशबलागमे ॥
ग्रन्थानधीत्य विविधानधि बुद्धवाचं
वादांश्च चेतसि विचार्य विभिन्नभावान् ।
विद्यार्थिवद्यविषय मितया गिरैव
प्रास्ताविकं किमपि लेखितुमत्र यत्नः ॥

अस्यां प्रस्तुतपुस्तिकायां जातककथाभ्यो विंशतिः कथाः समादाय विदुषां पुरः सांप्रतं प्राप्यन्ते एतास्ता जातककथाः 'पाली' इति प्रसिद्धायां भाषायां समुपनिबद्धाः समुपलभ्यन्ते । संप्रति सर्वेभ्यः पूर्वमयमेव प्रश्नः समुत्तिष्ठति केयं पाली नाम भाषेति । प्रश्नश्चायं कुतूहलविशेषेण संवलितः । प्रायशो जगतीतलेऽखिलेऽपि व्यक्तमेवेदं दरीदृश्यते यद्भाषाभिधानानि जनानां जनपदानां वा नामभ्यः प्रवर्तन्ते । नेदं खलु भाषाविज्ञानविदामेव वेद्यो विषयः । वयमपि द्रष्टुं पारयामो यद् वङ्गानां भाषा 'वङ्गला' इत्युच्यते । गुर्जराणां 'गुजराती', महाराष्ट्राणां 'मराठी', काश्मीराणां 'काश्मीरी' इत्यादयो व्यपदेशास्तमेव सिद्धान्तं स्थिरी कुर्वन्ति । नैवाद्यत्त्व एव भवति भाषानामीदृशः समयः । पुराऽपि शूरसेनानां भाषा 'शौरसेनी' इति, मगधानां 'मागधी' इति, महाराष्ट्राणां 'महाराष्ट्री' इति नामभिरेव व्यवाह्रियन्त । संप्रत्यपि तास्तथैवोद्दिश्यन्ते । तत् पालीति नामधेयं केनाऽपि देशविशेषेण जनपदविशेषेण वा दुरनुसन्धेयसम्बन्धत्वात् चित्रमिव किमपि चित्ते प्रतिभाति ।

अत्र सन्ति विविधा विप्रतिपत्तयो विदुषां भाषाविज्ञानजुषाम् । तत्र काश्चित् कपोलकल्पनाऽकुलितयथार्थभावा भारतीयानां मतिपथं यथातथमारोढुं नैव समर्थः । तदन्या अपि यद्यपि मान्यानां मतिमतां मस्तिष्कपरिष्कारवत्यः

समुत्कयन्ति जनानां मानसम्, तथाऽपि नैवाऽस्माकं हृदये परं प्रत्ययं समुत्पादयन्ति। तदत्र तास्ताः कल्पनानुकूलितकलेवरा वाचोयुक्तीः परित्यज्य विश्वासार्हयैव सारण्या पालिशब्दार्थविचारोऽत्र तावत् प्रस्तूयते।

अथ भगवान् बुद्धो यदा चिरसमाधिसिद्धिं सम्यग्ज्ञानरूपां 'बोधिं' लब्ध्वा चिरानुभूतां 'बोधिसत्त्व' इति पदवीमुल्लङ्घ्य बुद्धतामध्यरुक्षत्, तदाऽस्य परमकारुणिकतया लोकं शोकसन्तानादुद्धर्तुं बलवती मतिः प्रादुरभूत्। समाधिषु स्वानुभूतं तत्त्वं साधु समाधाय तदेव जनेष्वपि प्रख्यापयितुं स शास्ता भगवानियेष। काश्यामेव किल तस्योपदेशरूपं प्रथमं प्रवचनं जनैरश्रूयत। प्राकृतैरपि जनैर्मदीयोपदेशामृतं यथेच्छं निपीयतामिति सकरुणया मत्या व्यवसायिताशयो लौकिक्यैव गिरा स समुपदिदेश महापुरुषः। का नाम सा लौकिकी वाणी या भगवता तदर्थं संभाविता? असंशयमियमासीत् मगधेषु तदानीमुपयुज्यमाना काचिद् भाषा। मागधो हि बभूव भगवान् बुद्धः[१]। तस्य मगधदेशोत्पत्तिस्तु सर्वतो विश्रुतैवास्ते। ता भाषाऽपि मागधीत्येवोच्यताम्। किन्त्वत्रावधेयमिदम्। नैषा प्राकृतव्याकरणेषु प्रसिद्धा मागधी भवितुमर्हति[२]। इयमतिप्राचीना साऽर्वाचीना। उभयविनिगमनाय विद्वद्भिरेका 'बौद्धमागधी' इत्युच्यते। तदितरा 'प्राकृतमागधी' इति नाम्नाऽभिधीयते। इयं पुनर्बौद्धमागधी जैनानामागमभाषातः स्फुटमेव विभिद्यते। सा '[३]अर्द्धमागधी' इति प्रसिद्धाभिधानं भजते। भगवान् महावीरो मागधोऽपि भूत्वा शुद्धां मागधीं नैवोपायुङ्क्तेति 'अर्द्धमागधी' इति शब्देनैव स्फुटं प्रतीयते। इयं कयाऽप्यन्यया भाषया मिश्रिता मागधीति मन्यन्ते बहवो विद्वांसः। कल्पयन्ति च ते

तदुक्तं सासनवंसे—

१—"सो च भगवा मागधो मगधे भवत्ता, सा च भासा मागधी" इत्यादि। विस्तरार्थं विलोक्यताम् पाली-प्रकाशः, पृ० १३

२—तदुभयभेदावधारणाय विलोक्यताम्—पाली-प्रकाशः, पृ० १४

३—अर्द्धमागधीविशेषावबोधाय दृश्यताम्—

Ardhamagadhi Reader by Banarasi Das Jain.

Woolner: Introduction to Prakrit.

कोविदा यद् भगवता महावीरेण प्रभूतश्रोतृणां सुखावबोधाय स्वयमेव तादृशी भाषा विनियुक्ता[१]। यथा तथा वा भवतु, इयं बौद्धमागधी जैनानामर्द्धमागधीनो विभिन्नेत्यर्थोऽनेकैः प्रमाणैः साधु समर्थ्यंते[२]। इयमेव बौद्धमागधी पश्चात् 'पाली' इति प्रथां प्राप्तवतीति निर्विवादप्रायम्[३]।

अधुना 'पाली' इतिशब्दस्य कोऽर्थ इत्येव विचारयितुं प्रवर्तमहि। पालिशब्दो यथा संस्कृते तथैव बौद्धमागध्यामपि 'पङ्क्ति' इत्यर्थे प्रयुक्तो बहुशोऽवलोक्यते। तथा चोक्तमभिधानप्पदीपिकायाम्—"पन्ति वीथ्यावलिस्सेनि पालि रेखा च राजि च।" सांप्रतमपि पण्डितमण्डलीषु संस्कृतच्छात्रसंघेषु च विविधानीदृशानि वाक्यानि श्रवणगोचरतां नीयन्ते। 'तात्पर्यार्थस्तु गृहीतः किन्तु पङ्क्तिर्नैवाऽपि साधु स्फुटीभूता'; 'यदि परीक्षासु साफल्यं पूर्णमपेक्षसे, तर्हि पङ्क्तिषु विशेषेणावधानं देहि'; 'यथोच्यते श्रीमद्भिस्तथैवास्तां तावत्, किन्तु कथमेतत् पङ्क्तितोऽवसीयत इत्येव न खलु सम्प्रधारयामि'। नैवाधुनैवेदृशः प्रयोगोऽस्मास्ववतीर्णः, पूर्वाचार्याणामपि लेखेषु सोऽवलोक्यत एव। यथा तैत्तिरीयारण्यकभाष्ये भट्टभास्करः 'उमन्तु इति आम्नातपङ्क्तिः प्रणवोपासने विनियुज्यते।" यथा च कौटिलीयार्थशास्त्रस्योपोद्घाते 'कौटिलीयार्थशास्त्रपङ्क्तिरुदाहृता दृश्यते।"

यथा पङ्क्तिशब्दः संस्कृते 'मूलग्रन्थ' इत्यर्थे प्रयुक्तो दरीदृश्यते तथैव तस्मिन्नेवार्थे पालिशब्दो बौद्धमागध्यां प्रयुक्तोऽवलोक्यते। यथा महावंसे(महावंशे)बुद्धघोषकृतामत्थकथामुद्दिश्य प्रोक्तम् "थेरियाचरियासब्बे पालिं विषयतमग्गहुं (स्थविर-) आचार्याः सर्वे पालिमिव तामग्रहीषुः) यथा च सासनवंसे (शासनवंशे)—'जम्बूद्वीपे पन पालिमत्तं येव अत्थि अट्ठकथा पन नत्थि (जम्बूद्वीपे पुनः पालिमात्रमेवास्ति, अर्थकथा पुनर्नास्ति) अलमतिविस्तरेण एतावतैव मतिमतमिदं व्यक्तं भविष्यति

1—Bhandarkar, R.G.—Wilson Philological Lectures.

२—अवलोक्यताम्—पालीप्रकाशः, पृ० १६

Geiger W.—Pali Sprache und Literatur.

३—प्राकृतमागधीकृते विलोक्यताम्—

Banerji,—Sastri, A.—Evolution to Magadhi.

यत् पालिशब्दः प्रथमं मूलग्रन्थार्थे प्रयुक्तो बभूव। तदनु मूलग्रन्थसम्बद्धा ये चान्ये ग्रन्थास्तानपि बोधयितुमयं पालिशब्दः सर्वथाऽलमभूत्। मूलग्रन्थत्रौद्धानामेतेषां त्रिपिटकः। तत्सम्बद्धा ग्रन्थास्तु तदर्थकथास्तदन्ये च साक्षात् परम्परया वा तदनु गणतामावहन्तो ग्रन्थाः। एते सर्वे पालिशब्दवाच्या बभूवुः। ये पुनस्त्रिपिटकतश्च तदनुबद्धग्रन्थेभ्यश्च विभिन्ना बभूवुस्ते नैव समयेऽस्मिन् पालिशब्दवाच्यतां कदापि प्रापुः। तथा चोक्तं सासनवंसे (शासनवंशे)—"एते (महावंश) प्रभृति पालि मुत्तक वसेन वुउत्ता गन्धातरानि वुच्चति।"—एते (महावंशप्रभृतयः) पालिमुक्तक-वशेन वियुक्ता ग्रन्थान्तराणीत्युच्यन्ते।

एवं पालिशब्दो 'मूलग्रन्थे' द्योतयति स्मेति स्पष्टमेव। कालक्रमेणाऽयं पालिशब्दो यस्यां मूलग्रन्था लिखितास्तामेव भाषां बोधयितुं प्रवृत्तोऽभूत्। पालि-र्मूलग्रन्थस्तस्य भाषा पालिभाषा। भाषापदवियुक्तेऽपि पालिशब्दो भाषाया वाचको बभूव। तथा चोक्तं सासनवंसे (शासनवंशे)—"इच्चेवं पालिभाषाय परियत्तिं परियत्तिता" (इत्येवं पालिभाषायां परियत्तिं परियत्तिता।)

यदा प्रवृत्तः पालिशब्दो भाषाविशेषं द्योतयितुं तदाऽस्य शनैः शनैः पूर्व-तनोऽर्थोऽपि ततः पर्यहीयत। यत् किञ्चिदपि पालिभाषायां लिखितमभूत् तत् सर्वं पालिपदवाच्यतामगच्छत्। अथ कस्मिन्नवसरे प्रवृत्तिरियं पालिशब्दस्यार्थान्तरे प्रयोक्तुं प्रादुरभूत् इति प्रश्नो दुरुत्तर एव। चाइल्डर्स[1] महोदयस्य मतेन प्रथमं द्वितीयं वा ख्रिष्टाब्दशतकमेतस्य समयः। किन्तु तदुदाहरणानि बुद्धघोषात् पश्चादेव लिखितेभ्यो ग्रन्थेभ्यो बहुशः समुपलभ्यन्ते। बुद्धघोषस्तु[2] पञ्चमशतकेऽभूदिति विदुषां मतम्। अतः सम्भाव्यते तदनन्तरमेव बौद्धाः स्वग्रन्थभाषां पालिशब्देन प्रवक्तुमुपचक्रमिरे।

'पालिशब्दवतन्ति' शब्दोऽपि मूलग्रन्थार्थे बुद्धवचनेषु प्रयुक्तो बहुशो प्राप्यते। उभावपि शब्दौ पङ्क्तिवाचकत्वात् प्रायः समानार्थाविव। उभावपि तथा प्रयुक्तावपि दृश्येते एव। किन्तु भाषाविशेषवाचकत्वं तु पालिशब्देनैवोपलब्धम्। कथमिदमभूदिति सम्प्रति निर्णेतुमशक्यप्रायम्। स्यादत्र वक्तॄणां प्रवृत्तिरेव प्रधानं कारणम्।

1—Childers, R. C.—Dictionary of the Pali Language

2—Winternitz, M.—History of literature, Vol. II.

मूलग्रन्थवाचकः 'पालि' इति शब्दो कुतस्तद्भाषाया वाचकत्वं प्रापितः इत्यपि प्रश्नः साधु समाधातुं नैव सम्प्रति सत्प्रतिपत्तियुक्तैरप्यभियुक्तैः कथमपि पारितम्। इदमेवानुमातुं शक्यते यत् परिक्रामति सर्वाक्रमणशीले भगवति काले विस्मृतपदवीमुपगच्छत्सु च बौद्धवचनेषु बौद्धा यथावत् तद्रक्षणकार्यविबुद्धा यथा तदर्थे तथैव तच्छब्देऽपि समवधानं बबन्धुः। एवं समप्राधान्यं शब्दार्थयोः समुपसर्पति मानसे बौद्धकोविदानां नैतच्चित्रं यदेक एव वाचकतामभजत तदुभयस्य। यद्वा तद्वा भवतु, कथमपि वा तत् सम्भवतु, इदं तु निर्विवादमिव नः प्रतिभाति यत् पालिशब्दो मूलग्रन्थवाचकतां वहन्नपि तद्भाषावाचकत्वमपि कालक्रमेण प्रापत्।

पूर्वमेव निवेदितं यत् प्राच्याः प्रतीच्याश्चोभे विद्वांसः पालिशब्दनिरुक्तावप्रतिमं प्रतिभानं प्रादर्शयन्। केऽपि पाटलिपुत्र इत्यत्र प्रयुक्तात् पाटलिशब्दात् पालिशब्दो व्युत्पन्न इति मन्यन्ते। तदितरे 'पल्लि' इत्यस्मात् पालिशब्दस्योत्पत्तिमीहन्ते। ततोऽप्यन्ये मगधप्राचीनाभिधानात् 'पलाश' इत्यस्मात् वाञ्छन्ति पालिशब्दावतारम्। किमधिकं ब्रूमहे यदा 'पलेष्टाइन', 'पलटिन' इत्यादिभिरपि पदैः पालिशब्दस्य सम्बन्धोऽवबुध्यते। अलमेतैरतिमतिविकर्षितचित्तैः। पालिवैयाकरणास्तु—'सद्दत्थं पालेतीति पाली' इत्थमवोचुः। भवतु कल्पनाप्रसूतमेव व्याकृतिनिरतानां निरुक्तमिदम्। किन्तु सर्वथेदमसंगतमित्यपि वक्तुं नैव शक्यते[1]।

अलं विवादग्रस्तविषयमत्रोत्थाप्य। इदमेवावधेयम्। पालिशब्दो भाषाविशेषं बोधयति। अस्ति पालिर्नाम भाषा। अस्यामेव भाषायां बौद्धानां मूलधर्मग्रन्था लिखिताः समुपलभ्यन्ते। इयं भाषा जनानां जनपदानां वा नामधेयात् नैवाभिधानं स्वकीयं प्राप्तवती। पालिशब्दः प्रथमं मूलग्रन्थस्यार्थे प्रयुक्तो बभूव। तदनन्तरं कालक्रमेण मूलग्रन्थस्य भाषामपि द्योतयितुं प्रचक्रमे।

पालिभाषाया अभिधानमुत्पत्तिं च विचार्य संप्रति तस्यां लिखितानां ग्रन्थानां समालोचनं संक्षेपतः समारभेमहि। सांप्रतं द्विविधा हि बौद्धागमाः समुपलभ्यन्ते। तदेके संस्कृतवाण्या समुपनिबद्धास्तदितरे पालिभाषया। पालिभाषया समुद्ग्रथितास्तु ये सन्ति तदागमास्त एव प्राचीनतराः प्रामाणिकतराश्च। ते 'बुद्धवचनानि इति

1. Vidyabhusana, S. C.—Pali Grammar.

समाख्यया समाद्रियन्ते । कालक्रमेण द्वैविध्यमापतत् प्रधानभावेन बौद्धमतस्य महायानं हीनयानं चेति । बौद्धा अपि द्वैविध्यमभजन् । पालिशासनमनुरुन्धाना दाक्षिणात्या सिंहलब्रह्मादिदेशेषु तावदद्यापि जाग्रत्येव बौद्धाः । चीनमहाचीन-प्रभृतिजनपदेषु ये बौद्धा वर्तन्ते तदितरबुद्धानुशासनसम्प्रदायमनुरुध्यन्ते ।

पालिभाषायां लिखिता ग्रन्थाः[१] सम्प्रधारणसौकर्याय भागयोर्द्वयोः स्थापयितुं शक्यन्ते । प्रथमे धर्मग्रन्था भवन्ति, द्वितीये व्याकरणादिशास्त्रीयविषया ग्रन्थाः । धर्मग्रन्थाः 'त्रिपिटक' इत्यभिधीयमानेषु भागेषु विभक्ताः प्राप्यन्ते । एतानि ते भवन्ति (१) विनयपिटकम् , (२) सुत्तपिटकम् (सूत्रपिटकम्), (३) अभिधम्मपिटकम् (अभिधर्मपिटकम्) ।

(१) विनयपिटकम्

अत्र बौद्धसङ्घस्थानां भिक्षूणां समुपयुक्तान्यनुशासनानि साधु समाहितानि । अयं संग्रहो वैक्रमाब्दात् शतकत्रयपूर्वमेव समुपनिबद्धः सन्त्यस्य त्रयो विभागाः[२]—

(१) सूत्रविभङ्गः ।

(२) खन्धकाः (स्कन्धकाः) ।

(३) परिवारपाठः ।

(२) सूत्रपिटकम्

भगवतो बुद्धस्य प्रवचनरूपमिदं पिटकम् । वैक्रमाब्दात् सार्द्धशतकद्वयपूर्वमेव प्रादुर्भावमागतमिति विदुषां मतम् । निकायपञ्चकोपपन्नमिदं पिटकम् ।

(१) दीघनिकाय (दीर्घनिकायः) ।

(२) मज्झिमनिकाय (मध्यमनिकायः) ।

(३) संयुक्तनिकाय (संयुक्तनिकायः) ।

१—विस्तरस्तु ग्रन्थेष्वेतेषु द्रष्टव्यः—

Law, B. C.—History of Pali Literature.
Winternitz, M.—History of Indian Literature, Vol. II.
Hurst, G. L.—Sacred Literature.

२—अयं विभागः अत्थमालिनीमनुसृत्य दत्तः, गन्धवंसे तु भिन्न एव दृश्यते ।

(४) अङ्गुत्तरनिकाय (अङ्गोत्तरनिकायः) ।
(५) खुद्दकनिकाय (क्षुद्रकनिकायः) ।

(३) अभिधर्मपिटकम्—

पिटकमिदं किंरूपं किंप्रयोजनं वेत्यत्र विवदन्ते विपश्चितः । तेषां मतान्यालोच्येदमेवावसीयते यदिदं सूत्रपिटकस्य दार्शनिकं प्रतिरूपम् । येऽर्था निकायपञ्चके भगवदुक्ताः प्रवचनरूपेणोपलभ्यन्ते, त एवाऽत्र शास्त्रीयदृशा समवधार्य साधु समाधीयन्ते ।

अस्यैते विभागाः—

(१) धर्मसङ्गणिः ।
(२) विभङ्गः ।
(३) धातुकथा ।
(४) पुग्गलपञ्ञति [पुद्गलप्रज्ञप्तिः] ।
(५) कथावत्थु [कथावस्तु] ।
(६) यमकम् ।
(७) पट्ठान [प्रस्थानम्] ।

नाऽत्र वयं सर्वेष्वेतेषु कमप्याग्रहविशेषं बध्नीमस्तदलमनतिप्रयोजनीयेन विस्तरेण । सूत्रपिटके ये सन्ति पञ्चनिकायास्तेषामन्यतमः क्षुद्रकनिकायः । निकाये सन्ति ग्रन्था अधस्तादुल्लिखिताः ।

(१) खुद्दकपाठः [क्षुद्रकपाठः] ।
(२) धम्मपदम् [धर्मपदम्] ।
(३) उदानम् ।
(४) इति बुत्तकम् [इतिवृत्तकम्] ।
(५) सूत्तनिपातः [सूत्रनिपातः] ।
(६) विमानवत्थु [विमानवस्तु] ।
(७) पेतवत्थु [प्रेतवस्तु] ।
(८) थेरगाथा [स्थविरगाथा] ।
(९) थेरीगाथा [स्थविरगाथा] ।
(१०) जातकानि ।

तदेवं पश्यामो वयं यत् यतोऽस्यां पालिजातकावल्यां विंशतिर्जातककथाः समुद्गृहीतास्तानीमान्येव जातकानि बुद्धवचनेषु खुद्दकनिकाय (क्षुद्रकनिकायः) नाम योऽस्ति सूत्रपिटकस्यान्तिमो विभागस्तस्य दशमेऽङ्गे जातकानि सन्ति समुपनिबद्धानि ।

'जातक'[१] इतिशब्दस्य तावत् कोऽर्थः ? जनधातोर्निष्ठान्तो वा भावे क्त इत्यस्माद् वा शब्दोऽयं निष्पद्यते । अतो जातं भूतं कथेति यावत् । अथवा 'जातं जननं जनिः ।' भगवान् बुद्धो यदा सम्यग्ज्ञानाधिगमात् सम्यक् सम्बुद्धो बभूव स निसर्गत एव जातिस्मरज्ञानमपि लब्धवान् । सोऽविकम्पेन चेतसा सस्मार सर्वं तत् यदन्वभूव स प्राक्तनेषु जननेषु यथाकथाप्रसङ्गं स तानि पूर्वजन्मवृत्तानि भिक्षुभ्योऽचकथत् । एतान्येव 'जातकानि' इत्युच्यन्ते । प्रत्नतत्त्वविदामनुसन्धानेनेदं प्रतीयते यदिदमभिधानं वैक्रमाब्दात् शतकत्रयपूर्वमेव प्रायः प्रसिद्धिमापेदे । तृतीयसंगीतिनिर्धारितत्रिपिटकानि समादाय महाराजाशोकतनयो महेन्द्रो बौद्धमतप्रचाराय सिंहलद्वीपं *(Ceylon)* जगामेति सुप्रसिद्धमेव । इदमपि च कर्णगोचरीक्रियते यदासीत् काऽपि टीका जातकानां 'अत्थकथा' इति प्रसिद्धा । सैव गाथां विहाय सिंहलभाषयाऽनूदिता बभूव। संप्रति तदुभे अपि नोपलभ्येते । सिंहलटीकामधिष्ठाय 'जातकत्थवण्णना' इति प्रसिद्धा पालीटीका निर्मिता बभूव । इयमेव जातकैः समेता फोसबोल्पण्डितेन पञ्चसु भागेषु प्राकाश्यं नीता । अस्याः टीकाया भूमिका सुविस्तीर्णा 'निदानकथा'[२] इति नाम्ना सुविख्याता । जातकानामुत्पत्त्यादिविषये वर्ततेऽत्र महान् विचारसंचारः । कथं भगवान् बुद्ध एताः कथाः कथितवान्, कीदृशेषु प्रसंगेषु, कीदृशेष्ववसरेषु वा इत्यादिकं तत्रातिविस्तरेण प्रदत्तम् ।

१—अधिकावबोधाय डाक्टर विण्टरनिट्ज़ (Winternitz) महोदयस्य 'जातक' इति लेखः 'Encyclopaedia of Religion & Ethics' इति प्रसिद्धे विश्वकोषेऽवलोकनीयः । श्रीमता ईशानचन्द्रघोषेणानूदितानां जातकानां प्रस्तावनाऽपि विलोकनार्हा ।

२—Rhys David: Birth Stories इत्येतस्य ग्रन्थस्य भूमिकावलोकनीया ।

सूचना
कृपया, यहाँ का शेषांश पृष्ठ ६ पर देखिए ।

नमो तस्स भगवतो अरहतो सम्मासम्बुद्धस्स

नमस्तस्मै भगवते अर्हते सम्यक्संबुद्धाय

पालिजातकावलिः

(१) शिशुमारजातकम्

[इदं शास्ता[१] जेत्रवने विहरन् देवदत्तस्य वधाय परिशकन[२]मारभ्या[३]ऽवकथत् । तदा हि शास्ता देवदत्तो वधाय परिशक्यति' इति श्रुत्वा 'न भिक्षवः ! इदानीमेव देवदत्तो मम वधाय परिशक्यति, पूर्वमपि परिशक्यत्येव । सन्त्रासमात्रमपि पुनः कर्तुं नाऽशकत्' इत्युक्त्वाऽतीतमाहार्षीत्]

अतीते वाराणस्यां ब्रह्मदत्ते राज्यं कुर्वति हिमवत्प्रदेशे बोधिसत्त्वः कपियोन्यां निर्वृत्य नागबलः स्थामसम्पन्नो महाशरीरः सौभाग्यप्राप्तो भूत्वा गङ्गानिवर्तने अरण्यायतने वासमचिक्लिपत् । तदा गङ्गायामेकः शिशुमारोऽवात्सीत् । अथाऽस्य भार्या बोधिसत्त्वस्य शरीरं दृष्ट्वा तस्य हृदयमांसे दोहदमुत्पाद्य शिशुमारमाह—'अहं स्वामिन् ! एतस्य कपिराजस्य हृदयमांसं खादितुकामा' इति । 'भद्रे ! वयं जलगोचराः, एष स्थलगोचरः किमिति तं ग्रहीतुं शक्ष्यामः ?' इति । 'येन केनोपायेन गृहाण, चेन्न लप्स्ये मरिष्यामि' इति । 'तेन मा भैषीः, अस्त्येक उपायः इति खादयिष्यामि त्वां तस्य हृदयमांसम्' इति शिशुमारीं समाश्वास्य बोधिसत्त्वस्य गङ्गायाः पानीयं पीत्वा गङ्गातीरे निषण्णकाले अन्तिकं गत्वा एवमाह—'वानरेन्द्र ! अस्मिन् प्रदेशे कष्टफलानि खादन् किं त्वं चीर्णस्थान एव चरसि । पारगङ्गायां आम्रलकुचादीनां मधुरफलानां अन्तो नास्ति, किं ते तत्र गत्वा फलाफलं खादितुं न वर्तते' इति । 'कुम्भीलराज ! गङ्गा महोदका विस्तीर्णा, कथं तत्र गमिष्यामि' इति । 'चेत् गच्छसि अहं त्वां मम पृष्ठमारोप्य नेष्यामि' इति । स तं श्रद्धाय साध्विति

---

१ 'शासु अनुशिष्टौ' इत्यस्मात् 'तृन्-तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ' इत्यौणादिकसूत्रेण तृन् तृच् वा । 'शास्ता समन्तभद्रे ना, शासके पुनरन्यवत्' इति मेदिनी च । शास्ता बुद्धः । २ 'शक मर्षणे' इत्यस्मादिदमवगन्तव्यम् । ३ आलम्ब्य, उद्दिश्येत्यर्थः ।

१—सुंसुमार-जातकं ।

[इदं सत्था जेतवने विहरन्तो देवदत्तस्स वधाय परिसक्कनं आरब्भ कथेसि। तदा हि सत्था 'देवदत्तो वधाय परिसक्कती' ति सुत्वा 'न भिक्खवे इदानेव देवदत्तो मय्हं वधाय परिसक्कति, पुब्बेपि परिसक्कति येव। सन्तासमत्तम्पि पन कातुं न सक्खी'ति वत्वा अतीतं आहरि।]

अतीते वाराणसियं ब्रह्मदत्ते रज्जं कारेन्ते हिमवन्तपदेसे बोधिसत्तो कपियोनियं निब्बत्तित्वा नागबलो थामसम्पन्नो महासरीरो सोभग्गप्पत्तो हुत्वा गङ्गानिवत्तने अरञ्ञायतने वासं कप्पेसि। तदा गङ्गाय एको सुंसुमारो वसि। अथस्स भरिया बोधिसत्तस्स सरीरं दिस्वा तस्स हदयमंसे दोहळं उप्पा त्वा सुंसुमार आह—'अहं सामि, एतस्स कपिराजस्स हदयमंसं खादितुकामा'ति। 'भद्दे, मयं जलगोचरा, एस थलगोचरो, किन्ति तं गण्हितुं सक्खिस्सामा'ति। 'येन केन उपायेन गण्ह, सचे न लभिस्सामि मरिस्सामी'ति। तेन हि मा भायि, अत्थेको उपायोति खादापेस्सामि तं तस्स हदयमंस'न्ति सुंसुमारिं समस्सासेत्वा बोधिसत्तस्स गङ्गाय पानीयं पिवित्वा गङ्गातीरे निसिन्नकाले सन्तिकं गन्त्वा एवमाह—'वानरिन्द, इमस्मि पदेसे कसटफलानि खादन्तो किं त्वं चिण्णट्ठाने येव चरसि, पारगङ्गाय अम्बलकुचादीनं मधुरफलानं अन्तो नत्थि, किं ते तत्थ गन्त्वा फलाफलं खादितुं न वट्टती'ति। 'कुम्भीलराज, गङ्गा महोदिका वित्तिण्णा, कथं तत्थ गमिस्सामी'ति। 'सचे गच्छसि अहं तं मम पिट्ठिं आरोपेत्वा नेस्सामी'ति। सो तं सद्दहित्वा 'साधू'ति

संप्रतीष्य तेन हि 'एहि पृष्ठं मे अभिरोह' इति चोक्ते तमभ्यरुक्षत् । शिशुमारस्तोकं नीत्वा उदके अवासीषदत् । बोधिसत्त्वः 'सौम्य ! उदके मामवसादयसि, किं नु खलु एतत्' इत्याह । 'नाहं त्वां धर्मं सुधर्मतया, गृहीत्वा गच्छामि, भार्यायाः पुनर्मे तव हृदयमांसे दोहदः उत्पन्नः, तामहं तव हृदयं खादितुकाम' इति । 'सौम्य ! कथयता त्वया सुन्दरं कृतं, चेत् हि अस्माकं उदरे हृदयं भवेत् शाखाग्रेषु चरतां चूर्णविचूर्णं भवेत्' इति । 'कुत्र पुनः यूयं स्थापयथ' इति बोधिसत्त्वः अविदूरे एकमुदुम्बरं पक्वफलपिण्डिसम्पन्नं दर्शयन् 'पश्यैतानि अस्माकं हृदयानि एकस्मिन् उदुम्बरे अवलम्बन्ते' इति । 'चेन्मे हृदयं दास्यसि अहं त्वां न मारयिष्यामि' इति । तेन हि 'अत्र नय मां अहं ते वृक्षे अवलम्बमानं दास्यामि' इति । स तमादाय तत्रागमत् । बोधिसत्त्वस्तस्य पृष्ठत उत्पत्य उदुम्बरवृक्षे निषद्य 'सौम्य बाल शिशुमार ! एतेषां सत्त्वानां हृदयं नाम वृक्षाग्रे भवन्तीति संज्ञी अभूः । बालोऽसि, अहं त्वामवावञ्चे । तव फलाफलं तवैव भवतु । शरीरमेव पुनस्ते महत्, प्रज्ञा पुनर्नास्ति' इत्युक्त्वा इममर्थं प्रकाशयन् इमे गाथे अवोचत्—

अलमेतैराम्रैः जम्बुभिः पनसैश्च ।
यानि पारं समुद्रस्य वरं मम उदुम्बरः ॥
महती बत ते काया[1] न च प्रज्ञा तद्रूपिका ।
शिशुमार ! वञ्चितोऽसि गच्छेदानीं यथासुखम् ॥ इति ।

शिशुमारः सहास्रं पराजित इव दुःखी दुर्मना प्रध्यायन् आत्मनो निवासस्थानमेव गतः ।

[शास्तेदं देशनमाहृत्य जातकं समवादीधपत्–'तदा शिशुमारो देवदत्तोऽभूत् । शिशुमारी चिञ्चामाणविका, कपिराजः पुनरहमेव' इति ।

इति शिशुमारजातकम् ।

---

१ 'बोन्दि' इति शरीरवाची देशी-शब्दः । बुध्नशब्दसंबद्ध इति केचित ।

सम्पटिच्छित्वा तेन हि 'एहि, पिट्ठिं मे अभिरुहा'ति च वुत्ते तं अभिरुहि। सुंसुमारो थोकं नेत्वा उदके ओसीदापेसि। बोधिसत्तो 'सम्म, उदके मं ओसीदापेसि, किन्नु खो एत'न्ति आह। 'नाह तं धम्मे सुधम्मताय गहेत्वा गच्छामि, भरियाय पन मे तव हदयमंसे दोहळो उप्पन्नो, त अहं तव हदयं खादापेतुकामो'ति। 'सम्म, कथेन्तेन ते सुन्दरं कतं, सचे हि अम्हाकं उदरे हदयं भवेय्य साखग्गेसु चरन्तानं चुण्णविचुण्णं भवेय्या'ति। 'कहं पन तुम्हे ठपेथा'ति बोधिसत्तो अविदूरे एकं उदुम्बरं पक्कफलपिण्डिसम्पन्नं दस्सेन्तो 'पस्सेतानि अम्हाकं हदयानि एकस्मिं उदुम्बरे ओलम्बन्ती'ति। 'सचे मे हदयं दस्ससि अहं तं न मारेस्सामी'ति। तेन हि 'एत्थ नेहि मं, अहं ते रुक्खे ओलम्बन्तं दस्सामी'ति। सो तं आदाय तत्थ अगमासि। बोधिसत्तो तस्स पिट्ठितो उप्पतित्वा उदुम्बररुक्खे निसीदित्वा 'सम्म बालसुंसुमार, इमेसं सत्तानं हदयं नाम रुक्खग्गे होतीति सञ्ञी अहोसि, बालोसि, अहं तं वञ्चेसि, तव फलाफलं तवेव होतु। सरीरमेव पन ते महन्तं पञ्ञा पन नत्थी'ति वत्वा इममत्थं पकासेन्तो इमा गाथा अवोच—

अलं एतहि अम्बेहि जम्बूहि पनसेहि च।
यानि पारं समुद्दस्स वरं मय्हं उदुम्बरो॥
महती वत ते बोन्दि न च पञ्ञा तदूपिका।
सुंसुमार, वञ्चितोसि गच्छ दानि यथासुखन्ति॥

सुंसुमारो सहस्सं पराजितो विय दुक्खी दुम्मनो पज्झायन्तो अत्तनो निवेसनट्ठानमेव गतो।

[सत्था इमं देसनं आहरित्वा समोधानेसि—'तदा सुंसुमारो देवदत्तो अहोसि, सुंसुमारी चिञ्चामाणविका, कपिराजो पन अहं एवा'ति।]

सुंसुमारजातकं।

(२) वानरेन्द्र-जातकम्

[इदं शास्ता वेणुवने विहरन् देवदत्तस्य वधाय परिशकनमारभ्याऽचकथत् । तस्मिन् हि समये शास्ता 'देवदत्तो वधाय परिशक्यति' इति श्रुत्वा न भिक्षवः ! इदानीमेव देवदत्तो मम वधाय परिशक्यति, पूर्वमपि परिशक्यत्येव । त्रासमात्रमपि कर्तुं नाशकत्' इत्युक्त्वाऽतीतमाहार्षीत् ।]

अतीते वाराणस्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्त्वः कपि-योन्यां निर्वृत्य बुद्धिमवेत्य अश्वपोतप्रमाणः स्थामसम्पन्नः एकचरो भूत्वा नदीतीरे विहरति । तस्याः पुनर्नद्याः विमध्ये एको द्वीपको नानाप्रकारैः आम्रपनसादिभिः फलवृक्षैः सम्पन्नः । बोधिसत्त्वो नागबलः स्थामसम्पन्नो नद्याः अवरतीरतः उत्पत्य द्वीपकस्य अवरतः नदीमध्ये एकः पृष्ठिपाषाणः अस्ति तस्मिन् निपतति ततः उत्पत्य तस्मिन् द्वीपके पतति । तत्र नानाप्रकाराणि फलानि खादित्वा सायं तेनैवोपायेन प्रत्यागत्य आत्मनो वसनस्थाने उषित्वा पुनर्दिवसेऽपि तथैव करोति । अमुना नियमेन तत्र वासं कल्पयति । तस्मिन् पुनः काले एकः कुम्भीलः सप्रजापतिकः तस्यां नद्यां वसति । सा भार्या बोधिसत्त्वं अपरापरं गच्छन्तं दृष्ट्वा बोधिसत्त्वस्य हृदयमांसे दोहदं उत्पाद्य कुम्भीलमाह— 'मम खलु आर्य ! अस्य वानरेन्द्रस्य हृदयमांसे दोहद उत्पन्नः' इति । कुम्भीलः 'साधु भवति ! लप्स्यसे' इत्युक्त्वा 'अद्य तं सायं द्वीपकतः आगच्छन्तमेव ग्रहीष्यामि' इति गत्वा पृष्ठिपाषाणे न्यपप्तत् । बोधिसत्त्वो दिवसं चरित्वा सायाह्नसमये द्वीपस्थित एव पाषाण-मवलोक्य 'अयं पाषाणः इदानीं उच्चतरः ख्यायते, किन्नु कारणम्' इति अचिचिन्तत् । तस्य किल उदकप्रमाणं च पाषाणप्रमाणं च सुव्यवस्थापितमेव । तेनास्य एतदभूत् अद्य अस्य नद्या उदकं नैव हीयते न वर्धते, अथ च पुनरयं पाषाणो महान् भूत्वा प्रज्ञा-यते, कच्चिन्नु खलु अत्र मम ग्रहणार्थाय कुम्भीलो निपन्नः, इति ।

२—वानरिन्जातकं।

[इदं सत्था वेळुवने विहरन्तो देवदत्तस्स वधाय परिसक्कनं आरब्भ कथेसि। तस्मिं हि समये सत्था 'देवदत्तो वधाय परिसक्कती'ति सुत्वा 'न भिक्खवे इदानेव देवदत्तो मय्हं वधाय परिसक्कति, पुब्बेपि परिसक्कति येव, तासमत्तम्पि कातुं न सक्खी'ति वत्वा अतीतं आहरि।]

अतीते बाराणसियं ब्रह्मदत्ते रज्जं कारेन्ते बोधिसत्तो कपियोनियं निब्बत्तित्वा वुद्धिं अन्वाय अस्सपोतप्पमाणो थामसम्पन्नो एकचरो हुत्वा नदीतीरे विहरति। तस्सा पन नदिया वेमज्झे एको दीपको नानप्पकारेहि अम्बपनसादीहि फलरुक्खेहि सम्पन्नो। बोधिसत्तो नागबलो थामसम्पन्नो नदिया ओरिमतीरतो उप्पतित्वा दीपकस्स ओरतो नदीमज्झे एको पिट्ठिपासाणो अत्थि तस्मिं निपतति, ततो उप्पतित्वा तस्मिं दीपके पतति। तत्थ नानप्पकारानि फलानि खादित्वा सायं तेनेव उपायेन पच्चागन्त्वा अत्तनो वसनट्ठाने वसित्वा पुनदिवसेपि तथेव करोति। इमिना नियामेन तत्थ वासं कप्पेति। तस्मिं पन काले एको कुम्भीलो सपजापतिको तस्सा नदिया वसति। तस्स सा भरिया बोधिसत्तं अपरापरं गच्छन्तं दिस्वा बोधिसत्तस्स हदयमंसे दोहळं उप्पादेत्वा कुम्भीलं आह— 'मय्हं खो अय्य, इमस्स वानरिन्दस्स हदयमंसे दोहळो उप्पन्नो'ति। कुम्भीलो 'साधु भोति, लच्छसी'ति वत्वा 'अज्ज तं सायं दीपकतो आगच्छन्तमेव गण्हिस्सामी'ति गन्त्वा पिट्ठिपासाणे निपज्जि। बोधिसत्तो दिवसं चरित्वा सायण्हसमये दीपके ठितो'व पासाणं ओलोकेत्वा 'अयं पासाणो इदानि उच्चतरो खायति, किन्नु कारण'न्ति चिन्तेसि। तस्स किर उदकप्पमाणं च पासाणप्पमाणं च सुववत्थापितमेव होति। तेनस्स एत दहोसि-'अज्ज इमिस्सा नदिया उदकं नेव हायति न वड्ढति, अथ च पनायं पासाणो महा हुत्वा पञ्ञायति, कच्चि नु खो एत्थ मय्हं गहणत्थाय कुम्भीलो निपन्नो'ति।

स विमृशामि तावदेनम्' इति तत्रैव स्थित्वा पाषाणेन सार्द्धं कथयन्निव 'भो पाषाण !' इत्युक्त्वा प्रतिवचनं अलभमानः यावत्तृतीयं 'पाषाण' इत्याह—'पाषाण किं प्रतिवचनं न ददासि' इति पुनरपि तं वानरः 'किं भोः पाषाण अद्य मह्यं प्रतिवचनं न ददासि' इत्याह। कुम्भीलो 'अद्धा अन्येषु दिवसेषु अयं पाषाणो वानरेन्द्रस्य प्रतिवचनं अदात्, दास्यामि इदानीं अस्य प्रतिवचनम्' इति चिन्तयित्वा 'किं भो वानरेन्द्र', इत्याह। 'कोऽसि त्वं' इति। 'अहं कुम्भीलः' इति। 'किमर्थं अत्र निपन्नोऽसि' इति 'तव हृदयमांसं प्रार्थयमानः' इति। बोधिसत्त्वः अचिन्तित् 'अन्यो मे गमनमार्गो नास्ति, अद्य मया एष कुम्भीलो वञ्चयितव्यः' इति। अथैनमेवमाह—'सौम्य कुम्भील ! अहमात्मानं ते परित्यक्ष्यामि, त्वं मुखं विवृत्य मां तवान्तिकं आगतकाले गृहाण' इति। कुम्भीलानां हि मुखे विवृते अक्षिणी निमीलतः। स तत् कारणं असंलक्ष्य मुखं व्यवारीत्। अथास्य अक्षिणी प्यधायिषाताम्। स मुखं विवृत्य अक्षिणी निमील्य न्यपीपदत्। बोधिसत्त्वः तथाभावं ज्ञात्वा द्वीपकादुत्पतितो गत्वा कुम्भीलस्य मस्तकमाक्रम्य तत उत्पतितो विद्युल्लतेव विद्योतमानः परतीरे अस्थात्। कुम्भीलस्तदाश्चर्यं दृष्ट्वा 'अनेन वानरेन्द्रेण अत्याश्चर्यं कृतम्' इति चिन्तयित्वा 'भो वानरेन्द्र ! अस्मिन् लोके चतुर्भिर्धर्मैः समान्वागतः पुरुषः प्रत्यमित्राणि अभिभवति। ते सर्वेऽपि तवाभ्यन्तरे सन्ति मन्ये' इत्युक्त्वा इमां गाथामाह—

यस्यैते चत्वारो धर्माः वानरेन्द्र ! यथा तव।
सत्यं धर्मो धृतिस्त्यागः दृष्टं सोऽतिवर्तते ॥ इति।

एवं कुम्भीलो बोधिसत्त्वं प्रशस्य आत्मनो वासस्थानं गतः।

[शास्ता 'न भिक्षवः ! देवदत्त इदानीमेव मम वधाय परिशक्यति, पूर्वमपि पर्यशक्यत्येव' इतीदं धर्मदेशनमाहृत्य अनुसन्धिं ग्राहयित्वा जातकं समवादीधपत्। 'तदा कुम्भीलो देवदत्तोऽभूत्, भार्याऽस्य चिञ्चामाणविका, वानरेन्द्रः पुनरहमेव' इति।]

इति वानरेन्द्रजातकं।

एतस्माद् विविधवृत्तविस्तरादस्माकं प्रयोजनीयमपि बहु विषयं वयं लभामहे। एतानि जातकानि सार्द्धपञ्चशतसंख्यकानि द्वाविंशतिभागेषु विभक्तानि। प्राचीनकालेषु वर्तन्ते स्म बह्व्यो गाथाः। ता एव समाश्रित्य एताः कथा उदाहरणरूपेणासां प्रादुर्बभूवुः। तदेषां गाथानां क्रमवृद्धया द्वाविंशतिर्निपाताः संभवन्ति। एत एव विभागा जातकानाम्। जातकस्थत्वगणनाकारो जातकं विषयविभागमनुसृत्य पञ्चसु विभागेषु विभक्तवान्। तद्यथा—प्रथमस्तावत् पच्चुप्पन्नवत्थु। एतस्मिन् विभागे भगवतो बुद्धस्यावस्थानकाले वर्तमानानां प्रसङ्गानां व्यासङ्गेन प्रवृत्तानां कथांशानां निर्देशो वर्तते। द्वितीयो विभागः—अतीतवत्थु। एतस्मिन् विभागे जातकस्य प्रधानकथासमुद्देशः। बोधिसत्त्वावस्थायां भगवता बुद्धेनानुभूता वृत्तविशेषा अत्र सङ्गृहीता भवन्ति। तृतीयोंऽशस्तु गाथा भवति। चतुर्थोंऽशो गाथानां व्याख्यानरूपो 'वेय्याकरण' इत्युच्यते। पञ्चमोंऽशः समोधान इत्युच्यते। अत्र भगवता पूर्वेषां वृत्तानां वर्तमानैर्वृत्तैः समवधानं क्रियते।

जातकानां महत्त्वं बहुविधं वरीवर्त्ति। बौद्धानां कृते तु महत्त्वमेतेषामतीव हृदयग्राहि। अद्यापि सिंहलब्रह्मादिदेशेषु कथा एतेषां महोत्साहेन श्रूयन्ते समस्तां रात्रिं यावत् उपासकैरुपासिकाभिः। ये नैव सन्ति बौद्धधर्मावलम्बिनस्तेषामपि मानसमुत्साहयति जातकानां जात्यं महत्त्वम्। प्रथमं तावदिदमेव यदत्र प्राचीनतरा मागधी—प्राकृतभाषा लभ्यते। व्यक्तमेवेदं ज्ञायते यद् जातकस्य बह्वोंऽशा अशोकशिलालेखेषु लभ्यमानाभ्यो भाषाभ्यः प्राचीनतरां भाषामस्मदग्रे समानयन्ति। न खल्वेतावदेव महत्त्वं जातकानाम्। कथाविद्विदामपि कौतुकवहान्येतानि जातकानि। बह्व्यः कथा अत्रोपलभ्यन्ते याः सर्वदेशेषु सर्वभाषासाहित्येषु च प्रायः पदं केनचिद् रूपेण प्रापन्। अत्र सामाजिकावस्थानां चित्रणमपि बहुविधं बहुरूपेण प्राप्यते। ऐतिहासिकं तथ्यातथ्यमनुवर्ततां विदुषामस्ति महान् वादानामवकाशः, किन्तु वर्तत एवात्र प्रभूता सामग्री तथाविधा या सर्वथा विश्वासार्हेति मते नैव विद्यते कस्यचिदपि विमतिः। भारतीयस्थापत्यानुशीलने तथा मूर्तिनिर्माणकौशले च ये सम्यगैतिहासिकं याथातथ्यमनुसर्तुं यतन्ते तेषां तु जातकानीमानि महोपकारीणि।

यद्यपि बौद्धधर्मग्रन्थाः संस्कृते पालिभाषायां च समुपनिबद्धाः सन्ति, तथापि पालिभाषामविज्ञाय यथातथं भगवतो बुद्धस्य प्रादुर्भावप्रभावं नैव परिमातुं पार्यते। तार्किकमतिचमत्कारैश्चमत्कुर्वन्तु मानसान्यस्माकं बौद्धसंस्कृतग्रन्थाः, किन्तु यो विनय इत्युच्यते बौद्धैस्तमधिकृत्य विशुद्धं विज्ञानं पालिग्रन्थेष्वेवोपलभ्यते। बहवः सन्ति पालिग्रन्था दुर्बोधा दुर्लभाश्च। तान् संप्रति तज्जन्मभूमौ न कोऽपि प्रायः शक्नोति यथावदनुशीलयितुमध्यापयितुं वा। तेषु जातकान्येन सुलभाव-बोधानि वर्तन्ते। अत एव पालिग्रन्थार्थजिज्ञासुः प्रायः एतैरेव स्वाध्ययनं प्रारभते। इत्थं पश्यतां विपश्चितां नैवेदमपरोक्षं भविष्यति यदस्ति जातकेषु किमपि विचित्रं महत्त्वम्। एतेषामध्ययनेन भविष्यति महानुपकार इत्यत्र नाऽस्ति सन्देहलेशः। आशास्महे तद्वृत्तसंक्षेपमेतं पठित्वा भविष्यति कियतां हृदि कौतूहलोल्लासः। तेषामुपकारार्थं दीयन्तेऽत्र कतिपयेषां पुस्तकानां नामानि। तानधीत्य ते विषयमे-तमशेषमनुशीलयन्तु। संस्कृते हिन्दीभाषायां वा नास्ति कोऽपि समुचितो ग्रन्थ इति खिद्यति नश्चित्तम्। जिज्ञासायामुद्बुद्धायां सोऽपि सुलभो भविष्यतीति जायतेऽस्माकमाशा।

इदं किमपि तद्वृत्तं लिखितं शुद्धबुद्धितः।
भवेद्भगवतः प्रीत्यै सर्वज्ञस्य दयानिधेः॥

कतिपयेषां सहायकग्रन्थानां

सूची

Law, B. C.—History of Pali Literature.

Winternitz, M.—History of Indian Literature Vol. II.
—Article on 'Jataka' in the Encyclopaedia of Religion & Ethics.

Jataka—Text and Commentary (अत्थवण्णना) Edited by V. Fausboll, in 5 Vols.

Jataka—English Translation, Edited by Cowell, Cambridge University Press.

„ वङ्गानुवादः—ईशानचन्द्रघोषकृतः पञ्चभागेषु प्रकाशितः।

Rhys Davids—Buddhist Birth Stories (निदानकथाया अनुवादो भूमिकासमन्वितः)।

पण्डित विधुशेखरशास्त्री—पालीप्रकाशः (बंगला)।

पण्डित आद्यादत्तठाकुर—पालीप्रबोध (हिन्दी)।

Ghose. M. K.—Pali Translation and Composition.

जातककथामाला—श्रीरामचन्द्रवर्मकृत कुछ जातकों का हिन्दी अनुवाद।

Joshi—A Manual of Pali.

अत्रत्यजातकानां कथासंक्षेपः ।

१. शिशुमारजातकम्—

वानरस्य हृन्मांसे मे दोहदः समुत्पन्न इति भार्यया विज्ञापितः शिशुमारो वानरं स्वपृष्ठमारोप्य कैतवेन जले निमज्जयितुमीहते। किन्तु दयानि नः पादपेष्ववलम्बन्ते इति वानरेण प्रतारितः स तमुदुम्बरमूलं प्रापयति। तत्पृष्ठतः समुत्पत्य वानरो वृक्षाग्रमारोहति।

२. वानरेन्द्रजातकम्—

नद्याः परपारात् प्रतिनिवर्तमानस्य वानरस्य ग्रहणार्थं शिशुमारः पृष्ठिपाषाणो नाम भूत्वा तीरे समवतिष्ठते। वानरश्छलेन तं संलाप्य मुखं व्यादाय मां प्रतीच्छेत्युक्त्वा तडिदिव समुत्पत्य तत्पृष्ठे निपत्यापि क्षणात् परपारं प्राप्नोति।

३. बकजातकम्—

बकः कारुण्यात् मत्स्यान् सरोऽन्यन् नेष्यन्निव नीत्वा नीत्वा तान् निभृतं खादति। कर्कटस्तत्कण्ठमालम्ब्य गच्छन् कूटकपटमस्य विज्ञाय कर्तरिकयेव ग्रीवामस्य कृन्तंस्तं मारयति।

४. सिंहचर्मजातकम्—

सिंहचर्मपरिच्छन्नो गर्दभः ससुखं क्षेत्रेषु शस्यानि खादति। एकदा तं व्याघ्रं मत्वा जना दूरादेव विपुलं कोलाहलं चक्रुः। महान्तमारवमाकर्ण्य गर्दभेन स्वस्वरेणाराविः। गर्दभोऽयमिति ज्ञात्वा जनास्तं लगुडमारं मारयित्वा पञ्चत्वमेवानैषिषुः।

५. राधजातकम्—

ब्राह्मणो गृहात् प्रोष्यन् पुत्रकौ ! मे ब्राह्मणीमवेक्षेयमिति गृहस्थौ शुकपोतकावामन्त्र्य प्रस्थितः। गते तस्मिन् ब्राह्मणी यथेच्छमाचरितुमुपाक्रमत्। तयोरेकस्तदन्येन निषिद्धोऽपि तां हितमुपदिशन् तया प्राणैर्वियुयुजे। तदन्यः समुपागतं ब्राह्मणं सर्वमाख्याय ततो गतः।

६. नृत्यजातकम्—

हंसराजकन्या मयूरं वरं वृणुते स्म। स हर्षोत्कर्षेण सर्वं विस्मृत्य तत्रैव नर्तितुमारेभे। हंसराजस्तदालोक्य नाहमीदृशाय स्वकन्यां दास्यामीति निश्चित्य हंसपोतकायैव तामदात्।

७. उलूकजातकम्—

पक्षिणोऽपि कमपि नृपं चिकीर्षव उलूकं वरयामासुः। किन्तु काकस्तद्विरोधमकार्षीत्। ततः प्रभृति काकोलूकीयं वैरं प्रावृतत। पक्षिणः सुवर्णहंसं राजानमकार्षुः।

८. कुरङ्गमृगजातकम्—

मृगः शतपत्रः कच्छपश्चेति त्रयः सुहृदः सुसुखं निवसन्ति स्म। एकदा लुब्धकपाशगृहीतं मृगमालोक्य शतपत्रो गत्वा यावल्लुब्धकस्य आगमने विघ्नमाचरति तावत् कच्छपस्तत् पाशांश्छिनत्ति। अथ लुब्धक आगत्य कच्छपमादत्ते। मृगो लुब्धकं प्रलोभ्य दूरं नयति मार्गान्तरेणागत्य कच्छपं मोचयति।

९. यवशकुनजातकम्—

सिंहस्य गलेऽस्थिखण्डमलगत्। तं पीडाव्याकुलमालोक्य शकुनो न त्वां खादयिष्यामीति तेन प्रतिश्राव्य तन्मुखे दण्डकं च स्था-

पयित्वा प्राविशत् तदस्थिखण्डं चाकृषत्। अथान्येद्युर्महिषं खादन्त-मालोक्य सिंहमपृच्छत् किमपि शकुनः। मम दन्तान्तरगतोऽपि जीव-सीत्येव बहु मन्यस्वेति श्रुत्वा शकुनो गाथां गायन्नुड्डीनः।

१०. शशजातकम्—

शशो मर्कटः सृगाल उद्रश्चेति चत्वारि मित्राण्यभूवन्। शशो विधुमा-लोक्य श्वः उपवसथकाल इति विज्ञाय तेभ्यश्च धर्माचरणमादिदेश। सर्वे यथाशक्ति प्रायतन्त। शक्रः शशस्य धर्मपरीक्षितुमागात्। तदीयमलौ-किकत्यागमालोक्य तं बहुशः प्रशंसन् स्वस्थानं गतः।

११. मृतकभक्तजातकम्—

कश्चित् कोविदः श्राद्धं चिकीर्षुः स्वशिष्यान् छागं स्नापयित्वा तत्रा-नेतुं समादिशत्। स्नानमात्रश्छागो जहासोच्चै रुरोद च। तदनन्तर-मेतदुभयकारणं श्रुत्वा स विद्वान् तममुञ्चत्। यावद् ग्रीवां प्रसार्य घासमत्तुं याति तावत् पतत्यशनिः पञ्चत्वं चोपनीयते स च्छागः।

१२. बावेरुजातकम्—

बावेरुराष्ट्रे पक्षिणो नाभूवन्। देशान्तरागताद् वणिजः काकं क्रीत्वा जनास्तमेव बहुमन्यन्ते स्म। स एव वणिक् कालान्तरे मयूर-मादाय तत्र गतः। सम्प्रति मयूरमासाद्य ते प्रीततरा बभूवुः। समा-गते मयूरे समादरः काकस्य समद्रवत्। स स्वोचितमेव पदं तदानीं प्रापितः।

१३. वलाहाश्वजातकम्—

श्रीवस्तुवासिन्यो यक्षिण्यश्छलेन भग्नपोतान् वणिजः प्रलोभ्य स्वनगरं नयन्ति स्म, यथावसरं तान् खादन्ति स्म च। एकदा पञ्चशतं

वणिजस्तत्र तथैव प्राप्तास्ताभिस्तथैव प्रलोभ्य नगरं नीताः। ज्येष्ठवणिगासां यक्षिणीभावं ज्ञात्वा कतिपयैः सार्द्धं पलायितो बलाहाश्वेन स्वगृहं प्रापितः।

१४. शूर्पारकजातकम्—

शूर्पारको नाम निर्यामकज्येष्ठः प्रहतनेत्रत्वात् स्वकर्म प्रविहाय राज्ञोऽर्घापनीयकर्मणि प्रविष्टः। तत्राद्भुतकौशलं प्रदर्शयतोऽप्यस्य समुचितसमादरो नाऽभूत्। स्वस्थानमेव स प्रत्यागमत्। सोऽन्धोऽपि कृतेऽपि प्रत्याख्याने वणिग्भिर्निर्यामककर्मणि न्ययुज्यत। विविधान् समुद्रभागान् गत्वा व्यापारं च विपुलं विधाय निर्विघ्नः स्वदेशमुपागमत्।

१५. शीलानिशंसजातकम्—

एकदा कश्चिदार्यश्रावको नापितकुटुम्बेन सार्द्धं नावमभ्यरोहत्। सप्तमे दिवसे नौः समुद्रमध्ये भिन्ना। शीलादिसद्‌गुणोपपन्नत्वात् स उपासको देवतया रक्षितः। तस्य प्रार्थनया नापितोऽपि रक्षितः।

१६. चर्मशाटकजातकम्—

कोऽपि चर्मशाटकः परिव्राट् युध्यन्तमेवापक्रामन्तं मेषमेकं दृष्ट्वा अयं मम गुणान् जानाति सम्मानं च करोतीति स्थितोऽचिन्तयत्। एतस्मिन्नेवावसरे स मेषः सहसोपसृत्य तथा तं प्रहृतवान् तथाऽयं धरण्यां विगतासुः पपात्।

१७. उत्सङ्गजातकम्—

कस्याश्चित् स्त्रियः पतिः पुत्रो भ्राता च राजपुरुषैर्गृहीताः। राज्ञा पृष्टा सा योषित् स्वभ्रातुरेव मुक्तये प्रार्थितवती। सहोदरो भ्राता सुदुर्लभ इति सत्यं परिज्ञाय राजा प्रीतः सन् त्रीनपि बन्धनान् मुमोच।

१८. वैदर्भजातकम्—

आचार्यः सशिष्यो विपिने गच्छन् दस्युभिर्गृहीतः। धनमानीय स्वाचार्यं मोचयेति शिष्यस्तैः प्रेषितः। गच्छता शिष्येण प्रतिबोधितो भूत्वाऽपि स मन्त्रबलेन रत्नवर्षामकार्षीत्। रत्नलोभोपहताः सर्वेऽपि बभूवुः। शिष्यः परावृत्य दृष्ट्वा च सर्वं रत्नान्याददे। प्राणैर्वियुक्तो गृहमागतो दानादिधर्ममाचरन् सुखं जीवनमयापयत्।

१९. राजाववादजातकम्—

कोऽपि राजा निजावगुणानवगन्तुं स्थानात् स्थानान्तरं परिबभ्राम। स हिमवत्प्रदेशं प्राप्य बोधिसत्त्वाश्रमं प्रविवेश। तेन दत्तानि फलानि च बुभुजे। कस्मादिमानि सुमधुराणीत्युक्तो बोधिसत्त्वः प्राह—राजा यदा धार्मिको भवति तदा सर्वमेवैवं भवति। राजा प्रत्यागत्य स्वराज्यं धर्माचरणमारेभे। पुनस्तदाश्रमं गतो फलानि न तथा मधुराणि समुपलेभे। कारणं पृच्छंस्तेनोक्तः—राजा यदा स्वधर्मं यथावन्नावेक्षते तदा फलानि विस्वादूनि भवन्ति। राजा तं प्रणिपत्य गतः स्वदेशे यथावद् धर्मेण पालयामास पृथिवीम्।

२०. मखादेवजातकम्—

मखादेवो नाम राजा बभूव। स नापितेन विज्ञापितो देव! तवैकः केशः श्वेतीभूत इति महान्तं वैराग्यमापन्नः। स्वसुताय राज्यं प्रदाय प्रव्रज्यां जग्राह। चिरं तपांसि तप्त्वा स प्राप स्वपुण्यार्जितं ब्रह्मलोकम्।

सो वीमंसामि ताव नन्ति तत्थेव ठत्वा पासाणेन सद्धिं कथेन्तो विय 'भो पासाण'ति वत्वा पटिवचनं अलभन्तो यावततियं 'पासाणा'ति आह। 'पासाणो किं पटिवचनं न दस्सती'ति। पुनपि नं वानरो 'किं भो पासाण, अज्ज मय्हं पटिवचनं न देसी'ति आह। कुम्भीलो 'अद्धा अञ्ञेसु दिवसेसु अयं पासाणो वानरिन्दस्स पटिवचनं अदासि' दस्सामि दानिस्स पटिवचनन्ति चिन्तेत्वा 'किं भो वानरिन्दा'ति आह। 'को सि त्वं'ति। 'अहं कुम्भीलो'ति। 'किमत्थं एत्थ निपन्नोसी'ति। 'तव हदयमंसं पत्थयमानो'ति। बोधिसत्तो चिन्तेसि। 'अञ्ञो मे गमनमग्गो नत्थि, अज्ज मया एस कुम्भीलो वञ्चेतब्बो'ति। अथ नं एवमाह—'सम्म कुम्भील, अहं अत्तानं तुय्हं परिच्चजिस्सामि, त्वं मुखं विवरित्वा मं तव सन्तिकं आगतकाले गण्हाही'ति। कुम्भीलानं हि मुखविवटे अक्खीनि निमीलन्ति। सो त कारणं असल्लक्खेत्वा मुखं विवरि। अथस्स अक्खीनि पिथीयिंसु। सो मुखं विवरित्वा अक्खीनि निमीलेत्वा निपज्जि। बोधिसत्तो तथाभावं ञत्वा दीपका उप्पतितो गन्त्वा कुम्भीलस्स मत्थकं अक्कमित्वा ततो उप्पतितो विज्जुलता विय विज्जोतमानो परतीरे अट्ठासि। कुम्भीलो तं अच्छरियं दिस्वा 'इमिना वानरिन्देन अतिअच्छेरकं कत'न्ति चिन्तेत्वा 'भो वानरिन्द, इमस्मिं लोके चतूहि धम्मेहि समन्नागतो पुग्गलो पच्चामित्ते अभिभवति, ते सब्बेपि तुय्हं अब्भन्तरे अत्थि मञ्ञे'ति वत्वा इमं गाथमाह—

यस्सेते चतुरो धम्मा वानरिन्द! यथा तव।
सच्चं धम्मो धिती चागो दिट्ठं सो अतिवत्तवीति॥

एवं कुम्भीलो बोधिसत्तं पसंसित्वा अत्तनो वसनट्ठानं गतो।

[सत्था'नभिक्खवे देवदत्तो इदानेव मय्हं वधाय परिसक्कति, पुब्बेपि परिसक्कतियेवा'ति इमं धम्मदेसनं आहरित्वा अनुसन्धिघटेत्वा जातकं समोधानेसि। 'तदा कुम्भीलो देवदत्तोअहोसि, भरियास्सचिञ्चामाणविका, वानरिन्दोपन अहमेवा'ति। वानरिन्दजातकं]

(३) बक-जातकम् ।

[इदं शास्ता जेत्रवने विहरन् चीवरवद्धकं भिक्षुमारभ्याऽचकथत्...शास्ता 'न भिक्षवः ! जेत्रवनवासिचीवरवद्धक इदानीमेवैष अन्यान् वञ्चयते, पूर्वमपि वञ्चयते एव । न ग्रामवाधिकेनाऽपि इदानीमेवैष जेत्रवनवासिचीवरवद्धको वञ्चितः पूर्वमपि वञ्चित एव' इत्युक्त्वाऽतीतमाहार्षीत् ।]

अतीते एकस्मिन् अरण्यायतने बोधिसत्त्वोऽन्यतरं पद्मसरो निःश्रित्य स्थिते वृक्षे वृक्षदेवता भूत्वा न्यवृतत् । तदा अन्यतरस्मिन् नातिमहति सरसि निदाघसमये उदकं मन्दमभूत् । बहवश्चात्र मत्स्या अभूवन् । अत्रैको बकः तान् मत्स्यान् दृष्ट्वा 'एकेनोपायेन इमान् मत्स्यान् वञ्चयित्वा खादिष्यामि' इति गत्वा उदकपर्यन्ते चिन्तयन् न्यसदत् । अथ तं मत्स्या दृष्ट्वा 'किमार्य ! चिन्तयन् निषण्णोऽसि' इति अप्राक्षुः । 'युष्माकं चिन्तयन् निषण्णोऽस्मि' इति । 'अस्माकं किं चिन्तयसि आर्य' 'अस्मिन् सरसि उदकं प्ररिक्तम्, गोचरश्च मन्दो, निदाघश्च महान्, इदानीं मे मत्स्याः किं नाम करिष्यन्ति इति युष्माकं चिन्तयन् निषण्णोऽस्मि' इति । 'अथ किं कुर्मः आर्य' इति । 'यूयं चेत् मम वचनं कुर्यात्, अहं वः एकैकं मुखतुण्डकेन गृहीत्वा एकं पञ्चवर्णपद्मसंच्छन्नं महासरो नीत्वा विसर्जयेयम्' इति । 'आर्य प्रथमकल्पकतः पृथिव्यां मत्स्यानां चिन्तनकबको नाम नास्ति, त्वं अस्मासु एकैकं खादितुकामोऽसि' इति । 'नाहं युष्मान् मयि श्रद्दधानान् खादिष्यामि । चेत् पुनः सरसः अस्तिभावं मम न श्रद्दत्थ, एकं मत्स्यं मया सार्धं सरः प्रेषयथ' इति । मत्स्या तस्य श्रद्दधाय 'अयं जलेऽपि स्थलेऽपि समर्थः' इति । एकं काणमहामत्स्यमददुः 'इमं गृहीत्वा गच्छ' इति । स तं गृहीत्वा नीत्वा सरसि विसृज्य सर्वं सरो दर्शयित्वा पुनरानीय तेषां मत्स्यानामन्तिके व्यसाक्षीत् । स तेषां मत्स्यानां सरसः सम्पत्तियमवर्णत् । ते तस्य कथां श्रुत्वा गन्तु-कामा भूत्वा 'साधु आर्य अस्मान् गृहीत्वा गच्छ' इति आहुः ।

३—बकःजातकं।

[इदं सत्था जेतवने विहरन्तो चीवरवड्ढकं भिक्खुं आरब्भ कथेसि।—सत्था 'न भिक्खवे, जेतवनवासी चीवरवड्ढको इदानेव एस अञ्ञेवञ्चेतिति, पुब्बेपि वञ्चेसि येव। न गामवासिकेन पि इदानेव जेतवनवासी चीवरवड्ढको वञ्चितो, पुब्बेपि वञ्चितो येवा'ति वत्वा अतीतं आहरि।]

अतीते एकस्मिं अरञ्ञायतने बोधिसत्तो अञ्ञतरं पदुमसरं निस्साय ठिते रुक्खे रुक्खदेवता हुत्वा निब्बत्ति। तदा अञ्ञतरस्मिं नातिमहन्ते सरे निदाघसमये उदकं मन्दं अहोसि, बहू चेत्थ मच्छा होन्ति। अथेको बको ते मच्छे दिस्वा 'एकेन उपायेन इमे मच्छे वञ्चेत्वा खादिस्सामी'ति गन्त्वा उदकपरियन्ते चिन्तेतो निसीदि। अथ तं मच्छा दिस्वा 'किं अय्य, चिन्तेतो निसिन्नोसी'ति पुच्छिंसु। 'तुम्हाकं चिन्तेतो निसिन्नोम्ही'ति। 'अम्हाकं किं चिन्तेसि अय्या'ति। 'इमस्मिं सरे उदकं परित्तं, गोचरो च मन्दो, निदाघो च महन्तो, इदानिमे मच्छा किं नाम करिस्सन्तीति तुम्हाकं चिन्तेतो निसिन्नोम्ही'ति। 'अथ किं करोम अय्या'ति। 'तुम्हे सचे मय्हं वचनं करेय्याथ, अहं वो एकेकं मुखतुण्डकेन गहेत्वा एकं पञ्चवण्णपदुमसञ्छन्नं महासरं नेत्वा विस्सज्जेय्य'न्ति। 'अय्य, पठमकप्पिकतो पट्ठाय मच्छानं चिन्तनकबको नाम नत्थि, त्वं अम्हेसु एकेकं खादितुकामोसो'ति। 'नाहं तुम्हे मय्हं सद्दहन्ते खादिस्सामि, सचे पन सरस्स अत्थिभावं मय्हं न सद्दहथ एकं मच्छं मया सद्धिं सरं पस्सितुं पेसेथा'ति। मच्छा तस्स सद्दहित्वा 'अयं जलेपि थलेपि समत्थो'ति एकं काणमहामच्छं अदंसु—'इमं गहेत्वा गच्छथा'ति। सो गहेत्वा नेत्वा सरे विस्सज्जेत्वा सब्बं सरं दस्सेत्वा पुन आनेत्वा तेसं मच्छानं सन्तिके विसज्जेसि। सो तेसं मच्छानं सरस्स सम्पत्तिं वण्णेसि। ते तस्स कथं सुत्वा गन्तु-कामा हुत्वा साधु अय्य, अम्हे गण्हित्वा गच्छाही'ति आहंसु

बकः प्रथमं तं काणमहामत्स्यमेव गृहीत्वा सरस्तीरं नीत्वा सरो दर्शयित्वा सरस्तीरे जाते वरणवृक्षे निलीय तं विटपान्तरे प्रक्षिप्य तुण्डेन विध्यन् जीवितक्षयं प्रापय्य मांसं खादित्वा कण्टकान् वृक्षमूले पातयित्वा पुनर्गत्वा 'विसृष्टो मे स मत्स्यः अन्य आगच्छतु' इति । एतेनोपायेन एकैकं गृहीत्वा सर्वमत्स्यकान् खादित्वा पुनरागतो एकमत्स्यमपि नाऽद्राक्षत् । एकः पुनरत्र कर्कटको अवशिष्टः । बकस्तमपि खादितुकामो भूत्वा 'भो कर्कटक ! मया सर्वे ते मत्स्याः नीत्वा पद्मसंच्छन्ने महासरसि विसृष्टाः, एहि त्वामपि नेष्यामि' इति । 'मां गृहीत्वा गच्छन् कथं ग्रहीष्यसि' इति । 'दष्ट्वा ग्रहीष्यामि' इति । 'त्वमेवं गृहीत्वा गच्छन् मां पातयिष्यसि, नाहं त्वया सार्धं गमिष्यामि' इति । 'मा भैषीः अहं त्वां सुगृहीतं गृहीत्वा गमिष्यामि' इति । कर्कटकोऽचिचिन्तत् 'अस्य मत्स्यान् नीत्वा सरसि विसर्जनं नाम नास्ति । चेत् पुनर्मां सरसि विसृक्ष्यति, इत्येतत् कुशलम् । नो चेत् विसर्जयिष्यति, ग्रीवां अस्य छित्वा जीवितं हरिष्यामि' इति । अथैनमेवमाह... 'सौम्य बक ! न खलु त्वं सुगृहीतं ग्रहीतुं शक्ष्यसि, अस्माकं पुनर्ग्रहणं सुग्रहणम् । स चाहं अळेण तव ग्रीवां ग्रहीतुं लप्स्ये, तव ग्रीवां सुगृहीतां कृत्वा त्वया सार्धं गमिष्यामि' इति । स तं वंचितुकाम एष मां इति अजानन्, साध्विति संप्रत्यैषीत् । कर्कटकः आत्मनः अळैः कर्मकारसन्दशेनेव तस्य ग्रीवां सुगृहीतां कृत्वा 'इदानीं गच्छ' इत्याह । स तं नीत्वा सरो दर्शयित्वा वरणवृक्षाभिमुखं प्रायासीत् । कर्कटकः आह—'मातुल, इदं सरः अत्र, त्वं पुनः इतो नयसि' इति । बकः 'प्रिय मातुलकः अतिभगिनिपुत्रोऽसि मे त्वं' इत्युक्त्वा 'त्वमेष मां उत्क्षिप्य विचरन् मम दासः इति संज्ञां करोषि मन्ये । पश्यैतं वरणवृक्षमूले कण्टकराशिं यथा मया ते सर्वे मत्स्याः खादिताः त्वामपि तथैव खादिष्यामि' इत्याह । कर्कटकः 'एते मत्स्याः आत्मनो बालतया त्वया खादिताः । अहं पुनस्ते मां खादितुं

बको पठमं तं काणमहामच्छं मेव गहेत्वा रतीरं नेत्वा सरं दस्सेत्वा सरतीरे जाते वरणरुक्खे निलीयित्वा तं विटपन्तरे पक्खिपित्वा तुण्डेन विज्झन्तो जीवितक्खयं पापेत्वा मंसं खादित्वा कण्टके रुक्खमूले, पातेत्वा पुन गन्त्वा 'विस्सट्ठो मे सो मच्छो, अञ्ञो आगच्छतू'ति। एतेनुपायेन एकेकं गहेत्वा सब्बमच्छके खादित्वा पुन आगतो एकमच्छम्पि नाद्दस। एको पनेत्थ कक्कटको अवसिट्ठो। बको तम्पि खादितुकामो हुत्वा 'भो कक्कटक, मया सब्बे ते मच्छा नेत्वा पदुमसञ्छन्ने महासरे विस्सज्जिता, एहि तम्पि नेस्सामी'ति। 'मं गहेत्वा गच्छन्तो कथं गण्हिस्ससी'ति 'डसित्वा गण्हिस्सामी'ति। 'त्वं एवं गहेत्वा गच्छन्तो मं पातेस्ससि, नाहं तया सद्धिं गमिस्सामी'ति। 'मा भायि अहं तं सुगहितं गहेत्वा गमिस्सामी'ति। कक्कटको चिन्तेसि—'इमस्स मच्छे नेत्वा सरे विसज्जनं नाम नत्थि। सचे पन मं सरे विस्सज्जेस्सति इच्चेतं कुशलं, नो चे विस्सज्जेस्सति, गीवं अस्स छिन्दित्वा जीवितं हरिस्सामी'ति। अथ नं एवं आह—'सम्म बक, न खो त्वं सुगहितं गहेतुं सक्खिस्ससि, अम्हाकं पन गहणं सुगहणं, सचाहं अळेन तव गीवं गहेतुं लभिस्सामि, तव गीवं सुगहितं कत्वा तया सद्धिं गमिस्सामी'ति। सो तं 'वञ्चेतुकामो एस म'न्ति अजानन्तो 'साधू'ति सम्पटिच्छि। कक्कटको अत्तनो अळेहि कम्मारसण्डासेन विय तस्स गीवं सुगहितं कत्वा 'इदानि गच्छी'ति आह। सो तं नेत्वा सरं दस्सेत्वा वरुणरुक्खाभिमुखो पायासि। कक्कटको आह—'मातुल, अयं सरो पत्तो, त्वं पन इतो नेसी'ति। बको 'पियमातुलको अतिभगिनिपुत्तोसि मे त्व'न्ति वत्वा 'त्वं एस मं उक्खिपित्वा विचरन्तो मय्हं दासो'ति सञ्ञं करोसि मञ्ञे, पस्सेतं वरणरुक्खमूले कण्टकरासिं, यथा मे ते सब्बमच्छा खादिता तम्पि तथेव खादिस्सामी'ति आह। कक्कटक 'एते मच्छा अत्तनो बालताय तया खादिता, अहं पन ते मं खादितुं

न दास्यामि। त्वामेव पुनः विनाशं प्रापयिष्यामि। त्वं हि बालतया मम वञ्चितभावं न जानासि, म्रियमाणौ उभौ अपि मरिष्यावः। एष ते शीर्षं छित्वा भूम्यां क्षेप्स्यामि' इत्युक्त्वा संदंशेन अलैः तस्य ग्रीवां न्यपिपीडत्। स वृत्तकृतेन मुखेन अक्षिभ्यां अश्रुणा प्रक्षरता मरणभयतर्जितः 'स्वामिन् अहं त्वां न खादिष्यामि, जीवितं मे देहि' इत्याह। 'यद्येवं अवतार्य सरसि मां विसृज' इति। स निवृत्य सर एव अवतीर्य कर्कटकं सरःपर्यन्ते पङ्कपृष्ठे अतिष्ठिपत्। कर्कटकः कर्तरिकया कुमुदनलं कल्पयन्निव तस्य ग्रीवां कल्पयित्वा उदकं प्राविक्षत्। तदाश्चर्यं दृष्ट्वा वरणवृक्षे अध्यवस्था देवता साधुकारं ददाना वनं उन्नादयमाना मधुरस्वरेण इमां गाथामाह—

नात्यन्तनिकृतिप्रज्ञो निकृत्या सुखमेधते।
आराध्नोति निकृतिप्रज्ञो बको कर्कटकादिव ॥ इति।

[शास्ता 'न भिक्षवः ! इदानीमेव ग्रामवासिचीवरवर्द्धकेन एष वञ्चितः। अतीतेऽपि वञ्चित एव'इतीमं धर्मदेशनमाहृत्य, अनुसन्धिं घटयित्वा जातकं समवादीधपत्–तदा स जैत्रवनवासिचीवरवर्द्धकोऽभूत्, कर्कटको ग्रामवासिचीवरवर्द्धकः, वृक्षदेवता पुनरहमेव' इति।]

इति बकजातकम्।

---

(४) सिंहचर्म-जातकम्।

[इदं शास्ता जैत्रवने विहरन् कोकालिकमारभ्याऽकथत्। सोऽस्मिन् काले स्वरभङ्गं भणितुकामोऽभूत्। शास्ता तां प्रवृत्तिं श्रुत्वाऽतीतमाहार्षीत्।]

अतीते वाराणस्यां ब्रह्मदत्ते राज्यं कुर्वति बोधिसत्त्वः कर्षककुले निर्वृत्य वयःप्राप्तः कृषिकर्मणा जीवितमचिक्लिपत्। तस्मिन् काले एको वणिग गर्दभभारकेन व्यवहारं कुर्वन् विचरति। स

न दस्सामि, तञ्ञेव पन विनासं पापेस्सामि, त्वं हि बालताय मया वञ्चितभावं न जानासि, मरन्ता उभोपि मरिस्साम। एस ते सीसं छिन्दित्वा भूमियं खिपिस्सामी'ति वत्वा सण्डासेन विय अळेहि तस्स गीवं निप्पीळेसि। सो वत्तकतेन मुखेन अक्खीहि अस्सुना पग्घरन्तेन मरणभयतज्जितो 'सामि, अहं तं न खादिस्सामि, जीवितं मे देही'ति आह। 'यदि एवं ओतरित्वा सरस्मि मे विस्सज्जेही'ति सो निवत्तित्वा सरमेव ओतरित्वा कक्कटकं सरपरियन्ते पङ्कपिट्ठे ठपेसि। कक्कटको कत्तरिकाय कुमुदनाळं कप्पेन्तो विय तस्स गीवं कप्पेत्वा उदकं पाविसि। तं अच्छरियं दिस्वा वरणरुक्खे अधिवत्था देवता साधुकारं ददमाना वनं उन्नादयमाना मधुरस्सरेन इमं गाथमाह—

नाच्चन्तनिकतिप्पञ्ञो निकत्या सुखमेधति।
आराधे निकतिप्पञ्ञो बको कक्कटकामिवाति॥

सौम्य नाऊ ! जब मेरे सिर में पके हुए बालों को देखना, तब मुझे कहना।" नाऊ ने भी दीर्घ-काल को व्यतीत कर एक दिन राजा के काले रंग के केशों के मध्य एक ही पके बाल को देख, "देव ! एक पका हुआ बाल दिखाई दे रहा है" कहा। "तो सौम्य ! उस पके हुए बाल को उखाड़ कर मेरी हथेली पर रखो" कहने पर सोने की सँड़सी से उखाड़ कर राजा की हथेली पर रख दिया। उस समय राजा की चौरासी हजार वर्ष आयु अवशेष थी। ऐसा होने पर भी पके हुए बाल को देखकर ही मृत्युराज के आकर पास खड़ा होने के समान, और अपने को प्रज्वलित झोपड़ी में प्रवेश करने के समान समझता हुआ संवेग को प्राप्त हो, "मूर्ख मखादेव ! सिर में बालों के पकने तक भी इन क्लेशों को नहीं त्याग सका" (ऐसा) विचार किया। उसके इस प्रकार बालों के पकने की बात का विचार करते हुए (शरीर के) भीतर दाह उत्पन्न हो गया। शरीर से पसीना छूट चला। वस्त्र निचोड़ कर हटाने योग्य हो गये।

उसने "आज ही मुझे निकल प्रव्रजित होना उचित है' (सोच) नाऊ को एक लाख की आय वाले बड़े गाँव को दे, जेठे पुत्र को बुलवा कर, "पुत्र ! मेरे सिर में पके हुए बाल प्रगट हो गए। मैं वृद्ध हो गया हूँ। मैंने मानुषी कामों का भोग कर लिया। अब स्वर्गीय कामों को ढूँढूँगा। मेरे घर-बार छोड़कर निकलने का समय है। तुम इस राज्य को सम्हालो। मैं प्रव्रजित होकर मखादेव आम्रवन नामक उद्यान में रहते हुए श्रमण धर्म करूँगा" कहा।

उस ऐसे प्रव्रजित होने की इच्छा वाले (राजा) के पास अमात्यों ने जाकर, "आपके प्रव्रजित होने का क्या कारण है?" पूछा। राजा ने पके हुए बाल को हाथ से पकड़ कर अमात्यों को यह गाथा कही—

"ये मेरे बाल अवस्था-हरण करने वाले हो गए। देवदूत प्रगट हो गए। मेरी प्रव्रज्या का समय हो गया।"

वह ऐसा कह, उसी दिन राज्य त्याग ऋषियों की भाँति प्रव्रजित हो, उसी मखादेव-आम्रवन में विहार करते हुए चौरासी हजार वर्षों तक चार ब्रह्मविहारों* की भावना पर ध्यान के साथ ही रहते, मर कर ब्रह्मलोक में उत्पन्न हो, पुनः वहाँ से च्युत हो, मिथिला में ही निमि नामक राजा हो, समाप्त होते हुए अपने वंश को दृढ़ करके वहीं आम्रवन में प्रव्रजित हो, ब्रह्मविहारों की भावना कर फिर ब्रह्मलोक को ही चला गया।

[शास्ता ने भी "भिक्षुओ! तथागत ने इस समय ही नहीं महाभिनिष्क्रमण किया है, पहले भी किया ही था।" (कह) धर्मोपदेश दे, चार सत्यों को प्रकाशित किया। कोई-कोई स्रोतापन्न हुए, कोई-कोई सकृदागामी, कोई-कोई अनागामी। भगवान् ने इन दो कथाओं को कह मेल बैठा जातक को समाप्त किया। उस समय नाऊ आनन्द था, पुत्र राहुल, मखादेवराजा तो मैं ही था।

---

* मैत्री, करुणा, मुदिता और उपेक्षा को ब्रह्मविहार कहते हैं। इनकी भावना कर व्यक्ति ब्रह्मलोक में उत्पन्न होता है।

पालिव्याकरणसंक्षेपः ।

—(×)—

वर्णविचारः ।

पालिभाषायामष्टावेव स्वराः प्रयुक्ता दृश्यन्ते । ऋकारलृकारैकारौकाराणां दर्शनं नैवात्र लभ्यते ।

संस्कृतस्वराणां पालिस्वरेषु परिवर्तनप्रकाराणि कानिचित् सोदाहरणमधो विनिर्दिश्यन्ते ।

अ=आ, यथा—प्रत्यमित्रः = पच्चामित्तो ।
= इ, यथा—राजस्त्री=राजित्थि ।
= उ, यथा—निमज्जति = निमुज्जति ।
= ए, यथा फल्गु = फेल्गु ।
आ = अ, यथा—लासिका = लसिका ।
= ए, यथा—मातृका=मेत्तिका ।
इ,=अ, यथा-द्वित्रिकृत्वः = द्वत्तिक्खत्तुं ।
= उ, यथा—इषुः = उसु ।
ए, यथा—अग्रमहिषी—अग्गमहेसी ।
ओ, यथा—इक्ष्वाकुः = ओक्काको ।
ई = अ, यथा—कौसीद्यं = कोसज्जं ।
उ = अ, यथा—मुकुलं = मकुलं ।
= इ, यथा—पुरुषः = पुरिसो ।
= ए, यथा-डुण्डुभः = देड्डुभो ।
= ओ, यथा—प्रामुख्यं = पामोक्खं ।
ऊ = अ, यथा—कूर्परः = कप्परो ।
ओ, यथा—गुडूची=गोलोची ।

ऋ = अ, यथा · गृहं = गहं ।
= इ, यथा—ऋणं = इणं ।
= उ, यथा—ऋतुः = उतु ।
ए = इ, यथा—महेन्द्रः = महिन्दो ।
ओ, यथा-द्वेषः = दोसो ।
ऐ = ए, यथा—ऐरावणः = एरावणो ।
= इ, यथा—सैन्धवः = सिन्धवो ।
= ई, यथा—ग्रैवेयं = गीवेय्यं ।
ओ = उ, यथा—होत्रं = हुत्तं ।
औ = ओ, यथा—औदुम्बरं = ओदुम्बरं ।
= उ, यथा—औत्सुक्यं = उस्सुक्कं ।
ं (अनुस्वारः) = तद्वर्गीयवर्गपञ्चमाक्षरः ।
: विसर्गः पालिभाषायां नैव दृश्यते

अथ व्यञ्जनानां परिवृत्ति-
प्रकारः प्रदर्श्यते—

[असंयुक्तानाम्]

क = ग, यथा—मूकः = मूगो ।

क = ट, यथा—कक्कोलं = टक्कोलं ।
= क्क, यथा—भिषक् = भिसक्को ।
= य, यथा—स्वकं = सयं ।
= व, यथा—लकुचं = लवुजं ।
ग = क, यथा—भृङ्गारः = भिङ्कारो ।
= भ, यथा—गृहं = घरं ।
घ = ह, यथा—प्राघुणः = पाहुणो ।
च = ज, यथा—लकुचं = लबुजं ।
= त, यथा—चिकित्सा = तिकिच्छा ।
ज = च, यथा—प्राजयति = पाचेति ।
= द, यथा, ज्योत्स्ना = दोसिना ।
= य, यथा = निजं = नियं ।
ट = ठ, यथा—कण्टक = कण्ठक ।
ड, यथा—लेष्टुः = लेड्डुः ।
= ल, यथा—स्फटिकः = फलिको ।
= ल, यथा—आटविकः = आलविको ।
ड = ल, यथा—वडवा = वलवा ।
ढ = लह, यथा - दृढः = दलहो ।
ण = न, यथा—चिरेण = चिरेन ।
= ल, यथा—वेणुः = वेलुः ।
= ट, यथा - आर्तः = अट्टो ।
= थ, यथा—तुषः = थुसो ।
= द, यथा—वितस्तिः = विदत्थि ।
थ = ठ, यथा—ग्रन्थिः = गण्ठि ।
द = ट, यथा—प्रादुर्भावः = पाटुभावो ।
(पातुभावो)

द = ड, यथा = दंशः = डंसो ।
= त, यथा—कुसीदः = कुसीतो ।
य, यथा—खादितः = खायितो ।
= ल, यथा - परिदाहः = परिलाहो ।
ध = भ, यथा—अधिरोहण = अभिरोहणं
= ल, यथा—गोधिका = गोलिका (गोधिका)
= ह, यथा—श्रद्दधाति = सद्दहति ।
= लह, यथा—द्वेधकं × द्वैलहकं ।
न = ण, यथा—अवनतं = ओणतं ।
= ल, यथा —एनः = एलं
प = क, यथा—पिपीलकः = किपिल्लको ।
फ, यथा—पलितः = फलितो
= व, यथा—कपित्थ = कवित्थो ।
फ = प, यथा—स्फोटयति = पोठेति ।
ब = प, यथा—अलाबुः = अलापु ।
= भ, यथा - बुसं = भुसं ।
व, यथा—पिब = पिव ।
भ = ध, यथा—अभिप्रेतः = अधिप्पेतो ।
= ह, यथा - प्रभवति = पहोति ।
य = अ, यथा—कतिपयाहं = कतिपाहं ।
= इ, यथा—त्र्यहः = तिहो ।
ज, यथा = गवयः = गवजो ।
= ल, यथा - यष्टिः = लट्ठि ।
= ब, व, यथा—आयुवं = आवुधं ।
रेफ = (अनुस्वार)
यथा—अकार्षुः = अकंसु

ल = न, यथा—ललाटं = नलाटं
व = उ, यथा—लवणं = लोणं
श = छ, यथा-शवः = छवो
= ड, यथा—शाकं = डाकं
ष = छ, यथा—षष्ठः = छट्ठो
= ढ, यथा—आकर्षणं = आकड्ढनं
ह = घ, यथा—इह = इध
= भ, यथा—गह्वरं = गब्भरं

[संयुक्तानाम्]

क्थ = त्थ, यथा—सिक्थं = सित्थं
क्ष = (पदादौ) ख यथा क्षीरं = खीरं
= च, यथा—क्षुलुः = चुल्लो
= छ, यथा—क्षुद्रः = खुद्दो
क्ष = (पदमध्ये पदान्ते वा)
= क्ख, यथा—मोक्षः = मोक्खो
= च्छ, यथा—पक्षः = पच्छो
= ज्झ, यथा-विक्षायति = विज्झायति
ज्ञ = ञ, यथा—ज्ञानं = ञानं
= ञ्ञ, यथा—संज्ञा = सञ्ञा
ण्म = म्म, यथा—षण्मासः = सम्मासो
ण्य = ञ्ञ, यथा—अरण्यं = अरञ्ञं
त्य = च, यथा—त्यागः = चागो
= च्च, यथा—नृत्यं = नच्चं
थ्य = च्छ, यथा—मिथ्या = मिच्छा
त्स = च्छ, यथा—मत्स्य = मच्छो
द्य = ज, यथा—द्युतिः = जुति

द्य = ज्ज, यथा—अद्य = अज्ज
ध्य = झ, यथा—ध्यानं = झानं
= ज्झ यथा—सिध्यति = सिज्झति
न्य = ञ, यथा—न्यायः = ञायो
= ञ्ञ, यथा—अन्यः = अञ्ञो
= नि, यथा—न्यग्रोधः = निग्गोधो
प्त = त्त, यथा—प्राप्तः = पत्तो
प्स = च्छ, यथा—अप्सराः = अच्छरा
व्य = वि, यथा—व्यतिक्रमः = वितिक्कमा
= व, यथा—व्यायाम = वायामो
श्च = च्छ, यथा—आश्चर्यं = अच्छरियं
श्च = च्छ, यथा निश्चलः = निच्छलो
ष्क = क्क, यथा—दुष्करं = दुक्करं
= क्ख, यथा—शुष्कः = सुक्खं
ष्ट = ट्ठ, यथा—नष्टः = नट्ठो
ष्ठ = ट्ठ, यथा—षष्ठः = छट्ठो
ष्म = म्ह, यथा—ग्रीष्मः = गीम्हो
= स्स, यथा—जातिस्मरः = जातिस्सरो
स्क = ख, यथा—स्कन्धः = खन्धा
क्ख, यथा—प्रस्कन्दति = पक्खंदति
= क्क, यथा—नमस्कारः = नमक्कारो
स्ख = ख, यथा—स्खलितः = खलितो
स्त = त्थ, यथा—हस्त = हत्थो
= त्त, यथा—अस्तः = अत्तो
स्थ = त्थ, यथा—स्थूलः = थूलो
= ठ, यथा—स्थान = ठानं

स्थ = त्थ, यथा—अवस्था = अवत्था
= ट्ठ, यथा—प्रस्थाय = पट्ठाय
स्प = फ, यथा -स्पन्दः = फन्दो

स्फ = फ, यथा—स्फटिकः = फटिको
ह्य = य्ह, यथा—मह्यं = मय्हं
ह्व = व्ह, यथा—आह्वानं = आव्हानं

—०—

सन्धिप्रकरणम्

स्वरवर्णात्पूर्वस्य स्वरस्य क्वचिल्लोपः, यथा—यस्स + इन्द्रियाणि = यस्सिन्द्रियाणि

स्वरात्परस्य स्वरस्य क्वचिल्लोपः, यथा—वसलो + इति वसलोति

पूर्वस्वरे लुप्ते क्वचित्परस्य दीर्घत्वं, यथा—सचे + अहं = सचाहं

परस्वरे लुप्ते क्वचित्पूर्वस्य दीर्घत्वं, यथा—साधु + इति = साधूति

असमानस्वरवर्णपूर्वस्य इकारस्य इय, उकारस्य उव, इत्यादेशो भवति,
यथा—परि + एसना = परियेसना,
भिक्खु + आसने = भिक्खुवासने

व्यञ्जनपूर्वस्य सो एसो इतिशब्दद्वयस्य ओकारस्थाने अकारो भवति,
यथा—सो + सीलवा = स सीलवा, एसो + धम्मो = एस धम्मो।

अनुस्वारपरो यो वर्णस्तद्वर्गस्य पञ्चमाक्षरोऽनुस्वारस्थाने भवति।
यथा—जुतिं + धरो = जुतिन्धरो।

स्वरपूर्वस्य स्वरस्य कचित् 'द्' इत्यागमो भवति,
यथा—लघु + एस्सति = लघुमेस्सति।

स्वरपूर्वस्य स्वरस्य क्वचित् 'द्' इत्यागमो भवति,
यथा—सम्मा + अत्थो = सम्मदत्थो।

अनुस्वारपरस्य स्वरस्य क्वचिल्लोपो भवति, यथा—किं + इति = किन्ति

— :o: —

सुबन्तप्रकरणम्

(१) अकारान्तः पुलिङ्गो 'बुद्ध' शब्दः (२) इकारान्तः 'अग्गि' शब्दः

	एकवचन	बहुवचन	एक०	बहु०
प्र०	बुद्धो	बुद्धा	अग्गि	अग्गी
द्वि०	बुद्धं	बुद्धे	अग्गिं	अग्गी
तृ०	बुद्धेन	बुद्धेहि, बुद्धेभि	अग्गिना	अग्गिहि, अग्गिभि
च०	बुद्धस्स, बुद्धाय	बुद्धानं	अग्गिनो, अग्गिस्स,	अग्गिनं
०	बुद्धा, बुद्धस्मा, बुद्धम्हा	बुद्धेहि, बुद्धेभि	अग्गिना, अग्गिस्मा अग्गिम्हा	अग्गिहि अग्गिभि
ष०	बुद्धस्स	बुद्धानं	अग्गिनो, अग्गिस्स,	अग्गिनं
स०	बुद्धे, बुद्धस्मि बुद्धम्हि	बुद्धेसु	अग्गिनि, अग्गिस्मि, अग्गिम्हि	अग्गिसु अग्गीसु
सम्बो०	बुद्ध, बुद्धा	बुद्धा	अग्गि	अग्गी

(३) उकारान्तो 'भिक्खु' शब्दः (४) आकारान्तःस्त्रीलिङ्गः 'कञ्ञा' शब्दः

	एकवचन	बहुवचन	एक०	बहु०
प्र०	भिक्खु	भिक्खू, भिक्खवो	कञ्ञा	कञ्ञा, कञ्ञायो
द्वि०	भिक्खुं	भिक्खू, भिक्खवो	कञ्ञं	,, ,,
तृ०	भिक्खुना	भिक्खुहि, भिक्खुभि	कञ्ञाय	कञ्ञाहि, कञ्ञाभि
च०	भिक्खुनो, भिक्खुस्स	भिक्खूनं	कञ्ञाय	कञ्ञानं
प०	भिक्खुना, भिक्खुस्मा	भिक्खुहि, भिक्खुम्हा भिक्खुभि	कञ्ञाय	कञ्ञाहि, कञ्ञाभि
ष०	भिक्खुनो, भिक्खुस्स	भिक्खूनं	कञ्ञाय	कञ्ञानं

	एकवचन	बहुवचन	एक०	बहु०
स०	भिक्खुस्मिं, भिक्खुम्हि	भिक्खुसु	कञ्ञाय, कञ्ञायं	कञ्ञासु
सम्बो०	भिक्खु	भिक्खू, भिक्खवो	कञ्ञे	कञ्ञा कञ्ञायो

(५) ईकारान्तः 'इत्थी' शब्दः

प्र०	इत्थी	इत्थी, इत्थियो
द्वि०	इत्थिया, इत्थिं	,, ,,
तृ०	इत्थिया	इत्थिहि, इत्थिभि
च०	,,	इत्थिनं
प०	,,	इत्थिहि, इत्थिभि
ष०	,,	इत्थिनं
स०	,,	इत्थिसु
सम्बो०	इत्थि	इत्थी, इत्थियो

(७) उकारान्तो 'मधु' शब्दः

प्र०	मधु	मधू, मधुनि
द्वि०	मधुं	,, ,,

[शेषं भिक्खुशब्दवत्]

(६) अकारान्तो नपुं० 'चित्त' शब्दः

चित्तं	चित्ता,	चित्तानि
चित्तं	चित्ते	,,

[शेषं बुद्धशब्दवत्]

(८) सर्वनाम 'तुम्ह' शब्दः

त्वं, तुवं	तुम्हे
त्वं, तुवं, तवं, तं,	तुम्हाकं
त्वया, तया	तुम्हेहि, तुम्हेभि
तव, तुय्हं, तुम्हं	तुम्हाकं
त्वया, तया	तुम्हेहि, तुम्हेभि
तव, तुय्हं, तुम्हं	तुम्हाकं
त्वयि, तयि	तुम्हेसु

(९) सर्वनाम 'अम्ह' शब्दः

प्र०	अहं	मयं, अम्हे
द्वि०	मम, ममं	अम्हाकं, अम्हे
तृ०	मया	अम्हेहि, अम्हेभि
च०	मम, ममं, मय्हं, अम्हं	अस्माकं, अम्हाकं
प०	मया	अम्हेहि, अम्हेभि
ष०	मम, ममं, मय्हं, अम्हं	अस्माकं, अम्हाकं
स०	मयि	अम्हेसु

आख्यातकल्पः

(तिङन्तप्रक्रिया)

पालिभाषायां परस्मैपदप्रयोग एव प्रायो दृश्यते। गणाश्च धातूनामत्र सप्तैव भवति। अदादिजुंहोत्यादिस्तुदादिश्चे ति त्रयो गणा भ्वादिगण एव परिगणिता भवन्ति। लकारेष्वपि आशीर्लिङ्लुटोः प्रयोगो नैवोपलभ्यते। लिटोऽपि प्रयोगो विरल एव। लुङस्तु प्रचारः प्रचुरतरः।

भूधातोः रूपाणि—

लट्

	एकवचन	बहुवचन
प्रथमपुरुष	भवति, होति	भवन्ति, होन्ति
मध्यमपुरुष	भवसि, होसि	भवथ, होथ
उत्तमपुरुष	भवामि, होमि	भवाम, होम

लोट्

प्र० पु०	भवतु, होतु	भवन्तु, होन्तु
म० पु०	भव, भवाहि, होहि	भवथ, होथ
उ० पु०	भवामि, होमि	भवाम, होम

विधिलिङ्

प्र० पु०	भवेय्य, भवे,हेय	भवेय्युं, हेयुं
म० पु०	भवेय्यासि, भवे, हेय्यासि	भवेय्याथ, हेय्याथ
उ० पु०	भवेय्यामि, भवे, हेय्यामि	भवेय्याम, हेय्याम

लङ्

प्र० पु०	अभवा, अभूवा	अभवु, अहुवु, अहुवू
म० पु०	अभवो, अहुवो	अभवत्थ, अहुवत्थ
उ० पु०	अभव, अभवं अहुवं	अभवम्हा, अहुवम्हा

लुङ्

	ए० व०	ब० व०
प्र० पु०	अभवि, अभवी, अहोसि, अहू	अभवुं, अभविसु अहेसु, अहवुं
म० पु०	अभवो, अभवि, अहोसि	अभवित्थ, अहोसित्थ
उ० पु०	अभविं, अहोसिं, अहुं	अभविम्हा, अभविम्ह अहोसिम्ह, अहुम्ह

† लृट्

प्र० पु०	भविस्सति	भविस्संति
म० पु०	भविस्ससि	भविस्सथ
उ० पु०	भविस्सामि	भविस्साम

लृङ्

प्र० पु०	अभविस्सा, अभविस्स	अभविस्संसु
म० पु०	अभविस्से, अभविस्स	अभविस्सथ
उ० पु०	अभविस्सं	अभविस्सम्हा, अभविस्सम्ह

---o---

अव्यय-प्रकरणम्

उपसर्गाः—प्रादयः क्रियायोगे उपसर्गा इत्युच्यन्ते । तेऽत्रापि पालिभाषायां संस्कृत इव विंशतिरेव। यथा संस्कृते उपसर्गेण धात्वर्थो बलादन्यत्र नीयते तथैवात्राऽपि। पालिवैयाकरणैरेषां त्रिधा गतिरुपलक्षिता। तद् यथा—

धात्वत्थ बाधते कोचि कोचि तमनुवत्तते ।
तमेवञ्ञे विसेसेन्ति ·उपसग्गगती त्रिधा ॥

† हू इत्यादेशेकृतेऽत्र बहूनि रूपाणि सम्भवन्ति विस्तरभयान्नात्र प्रदर्शितानि ।

विभक्त्यर्थान्यव्ययानि—कानिचिदव्ययानि विभक्त्यर्थे प्रयुज्यन्ते। तद् यथा—

प्रथमार्थे—अत्थि, सक्का इत्यादीनि।

द्वितीयार्थे—दिवा, भिय्यो ,,

तृतीयार्थे—सयं, सामं ,,

सप्तम्यर्थे—अपरज्जु, एकज्झ ,,

सर्वनामनिष्पन्नान्यव्ययानि—कानिचिदव्ययानि सर्वनामशब्दैर्निष्पद्यन्ते। तद् यथा—

कुहिं, तहिं, अञ्ञथा प्रभृतीनि।

कृदन्तप्रकरणम्

शतृ, शानच् = अन्त, आन, मान। यथा–गच्छन्तो, गच्छानो, गच्छमानो।

तवत् = तावी। यथा–भुत्तावी (भुक्तवान्)।

क्त, तवत = त, तवन्त। यथा–हुतो (हुतः), हुतवा (हुतवान्)।

तव्यत् = तब्ब। यथा–भवितब्बं।

क्त्वा, ल्यप् = त्वा, त्वान, तून, य। यथा–कत्वा, कत्वान, कत्तून, निस्साय, निस्सित्वा।

तुमुन = तुं, तवे। यथा–कातुं, कत्तुं, कातवे, कत्तवे।

कारकप्रकरणम्

सप्तम्यर्थे कदाचिद् द्वितीया प्रयुज्यते। तद् यथा—एकं समयं भगवा सावत्थियं विहरति = एकस्मिन् समये भगवान् श्रावस्त्यां विहरति।

सप्तम्यर्थे कदाचिद् तृतीया प्रयुज्यते । तद् यथा—तेन खो पन समयेन भगवा ,तदवोच=तस्मिन् खलु पुनः समये भगवान् एतदवोचत् ।

———

समासप्रकरणम्

पालिभाषायां समा क्वचित् सन्धेरभावः—आवट्ट—ऊमिवेगजनित हलाहलसद्दं ।

समासपूर्वपदस्थयो आकारेकारयोः क्वचिद् ह्रस्वत्वम्, यथा—वाराणसिरञ्ञो, इत्थिभावो ।

तद्धितप्रकरणम्

केऽपि तद्धितप्रत्ययाः पालिभाषायां प्रयुक्ता अधः प्रदर्श्यन्ते—

इम—पच्छा जातो इति पच्छिमो (पश्चिमः) ।

ईय—मदनस्स ठानं इति मदनीयं ।

आयितत्त—तिमिर विय दिस्सतीति तिमियातत्तं ।

ल—वेदस्स ठानं वेदनिस्सितं वा वेदल्लं ।

त्तन—पुथुजनस्सभावो पुथुज्जनत्तनं (पृथग्जनत्वम् ।)

इस्सिक—पापिस्सको (पापीयः, पापिष्ठः) ।

क्खत्तुं—द्विक्खत्तुं (द्विकृत्वः) ।*

---

* एतस्मिन् पालिव्याकरणसंक्षेपे श्रीमतां विधुशेखरशास्त्रिणां पालिप्रकाशात् स्थले स्थले साहाय्यमासादितमित्येषाम्भारं ससंमदमूरीकुर्मः । विस्तरस्तु जिज्ञासुभिस्तत्रैव ग्रन्थरत्ने विलोकनीयः ।

अथ पालिपाठपदोच्चयः

[अ]

अकंसु—(अकार्षुः)√कृ + लुङ्,
प्रथ० बहु० कृतवन्तः, अकुर्वन् ।

अकञ्ञुतं-(अकृतज्ञतां कृतघ्नताम् ।

अकतञ्ञु - अकृतज्ञम्) कृतज्ञता-
रहितम्,कृतघ्नम् । 'कतगुणं अजा-
नन्तं' इति जातकत्थवण्णना ।

अकत्तारं-(अकर्त्तारम्) प्रत्युपकार-
कृतिशून्यम् 'सयं किञ्चि अकरोन्तं'
इति जातकत्थवण्णना ।

अकरम्हसे-(अकार्ष्व, अकार्ष्महि)
√कृ+लुङ्, उत्त०, बहु० एकवच-
नार्थे बहुवचनप्रयोगः, अकरोमित्यर्थः ।

अगमंसु--अगमन्) √ गम+लुङ्,
प्रथ० बहु० अगच्छन्, गताः ।

अगमासि—अगमत् √ गम+लुङ्,
प्रथ० एक० अगच्छत्, गतः ।

अग्घापनियकम्मं--(अर्घापनीयकर्म,
अर्घापनिककर्म) वस्तुमूल्यनिर्णा-
यिकं कर्म ।

अग्घापेति-(अर्घयति) मूल्यं निश्चि-
नोति । 'अग्घो मूले च पूजने'
इत्यभिधानप्पदीपिका ।

अचन्तनिकतिप्पञ्ञो-(अत्यन्तनिकृति-
प्रज्ञः अतिकपटबुद्धिः, अतिदुष्टाशयः

अच्छरासद्दा (अनिश्चितनिरुक्तिकमिदं
पदम् । केचिदक्षरशब्देन तदन्ये
'अच्छरा' इति देशिपदेन
सम्बन्धमीहन्ते ।) 'अच्छरा' इति
अंगुलीत्रोटनशब्दः ।

अज्झत्तसमुट्ठाना—(आध्यात्मसमु-
त्थाना) आभ्यन्तरोद्भवा ।

अज्झासयगहणत्थं—(अध्याशयग्रह-
णार्थं)हृदयभावबोधाय, तेषां हृदये
कीदृशो विचार इति ज्ञानार्थम् ।

अञ्ञमञ्ञं-(अन्योन्यं) परस्परम् ।

अञ्ञातकवेसेन—(अज्ञातकवेषेण)
अपरिचितानुरूपपरिच्छदेन ।

अट्टत्थाय—(अर्थार्थाय) व्यवहारवि-
निश्चयाय । अधिकृतैर्व्यवहारो
यथावद् दृश्येतेति हेतुना ।

अट्ठासि-- (अस्थात्)√स्था+लुङ्,
प्रथ० एक० अतिष्ठत् ।

अट्ठुसभमत्तं-(अष्टोषभमात्रम्) उसभं
अध्व-परिमाणविशेषः । तत्परि-
माणम् । 'उसभं बीसयट्ठियं'
इत्यभिधानप्पदीपिका ।
उसभ=२० यष्टि ।

अड्ढतियानि—(अर्धतृतीयानि) सार्द्धद्विशतम् 'तृतीयोऽड्ढतियो तथा अड्ढतेय्यो' इत्यभिधानप्पदीपिका

अतिभगिनिपुत्तो—(अतिभगिनीपुत्रः) अतिप्रियो भागिनेयः।

अत्थि—(अस्ति) वर्तते, विद्यते। √ अस + लट्, प्रथ० एक०। बहुवचने 'सन्ति' इत्यर्थेऽपि प्रयुज्यते।

अत्तभावो—(आत्मभावः शरीरम्। 'अत्तभावो बोन्दि विग्गहो' इत्यभिधानप्पदीपिका।

अदासि—(अदात्) √ दा + लुङ्, प्रथ० एक० अयच्छत्, दत्तवान्,

अद्दस—(अद्राक्षीत्) √ दृश + लुङ् प्र० एक० अपश्यत्।

अधिवासापेसि—(अधिवासयसि) अधि √ वस + लट् + णिच्, मध्य० ए०० अवस्थातुमादिशसि

अधिवासेत्वा—(अधिवास्य) अधि+ √ बस + णिच् + ल्यप्।
वासं कारयित्वा।

अधिवासेथ— अधिवसत) अधि + √ वस + लोट्+मध्य० बहु० अत्रैव वासं कुरुत।

अनिय्यानिकं—(अनिर्याणिकं) अहितं, हानिकरम्।

अनुच्छविको—(आनुच्छविकः) अनुरूपः, योग्यः 'पतिरूपोऽनुच्छविको' इत्यभिधानप्पदीपिका।

अनुञ्ञातत्ता—(अनुज्ञातत्वात्)अनु+ √ ज्ञा + क्त+त्व। अनुमतत्वात्

अनुबन्धि—(अन्वभान्त्सीत्)अनु+√ √बन्ध + लुङ्, प्रथ० एक०। अन्ववध्नात्, अन्वसरत्।

अनुसासि—(अन्वशात्) अनु + √ शास + लुङ्, प्र० एक०। अन्वतिष्ठिपत्, कृतवानिति यावत्।

अनुसुय्य—(अनसूयम्) असूयारहितं, ईर्ष्याशून्यम्।

अनुस्सरित्वा—(अनुस्मृत्य) अनु+ √स्मृ+क्त्वा। स्मृतिं सम्प्राप्य

अन्तोडाहो—(अन्तर्दाहः) अनुतापस्वरूपो हृदयसन्तापः।

अपटिच्छिन्नो—(अप्रतिच्छन्नः) प्रतिच्छदरहितः नग्नः।

अपनेतब्बाकारपत्ता-(अपनेतव्याकारप्राप्ताः) अपनेतव्यं दूरीकरणीयं आकारं स्वरूपं अवस्थां प्राप्ताः गताः। अतिप्रचुरपरिमाणा इत्यर्थः

अपानयि—(अपानैषीत्) अप +√ नी + लुङ्, प्रथ० एक० अपानयत्

अपाभतं–(अपाभृतम्) अप+आ–√भृ+क्त। आनीतम्।

अपूजेसुं–(अपूपुजन्)√पूज+लुङ्, प्रथ० बहु०अपूजयन्, सत्कृतवन्तः।

अप्पतिकारकं–(अप्रतिकारकम्) परोपकृतिं विस्मृत्य, प्रत्युपकारविमुखम्।

अप्पतिस्स–(अपतेः) पतिरहितस्य अस्वामिकस्य।

अभिरूहि–(अभ्य-ध्य-रुक्षत्) अभि-धि + √रुह+लुङ्, प्रथ० एक०। अध्यारूढः।

अरक्खिता–(अरक्षिता) दुरवेक्ष्या, दुश्चरित्रा, कुलटा।

अरियसावको–(आर्यश्रावकः) शिष्यविशेषः, विशिष्टो विद्यास्नातकः।

अरुणुग्गमना–(अरुणोद्गमनात्) सूर्योदयारम्भात्।

अलङ्कतपटियत्ता–(अलङ्कृतप्रतियत्ताः) अलम्+√कृ+क्त+प्रति√यत्+क्त। अलङ्कारैर्विभूषिताः, प्रयत्नपरिभूषिताः।

अवसितं–(शोभनम्) 'पणीतो ती सुमधुरे उत्तमे निहितेप्यथ' इत्यभिधानप्पदीपिका।

अवीचि–(अवीचिः) अष्टानां नरकानामन्यतमः। यथोक्तम्–संजीवो कालसुत्तो च मतारोरुव रोरुवा। पतापनो अवीचि त्थी संघातो तपनो इति।

असक्खि–(अशकत्)√शक+लुङ्, प्रथ० एक०। अपारयत्।

अहायथ–(अहायि)√हा+लुङ्, प्रथ० एक० परिहीनः।

अहुवम्हसे–(अभूम)√भू+लुङ्, उत्त० बहु०। अत्र न केवलं वचनविपर्ययः पुरुषविपर्ययोऽपि। अभूदित्यर्थः।

अहेसुं–(अभूवन्)√भू+लुङ्, प्र० बहु० आसन्, अभवन्।

अहोसि–(अभूत)√भू+लुङ्, प्रथ० एक० अभवत्।

अलं–(अलं) कर्कटादिकानां संदशाकारं तुण्डम्।

[आ]

आचक्खि–(आख्यत्) आ+√चक्ष + लुङ्, प्रथ०एक० अवदत्।

आदित्तपण्णसालं–(आदीप्तपर्णशालाम्) प्रज्वलितोटजम्। अग्निपरिगृहीतपर्णाच्छादनभवनम्

आदीनवो–(आदीनवः) दोषः, क्लेशः 'आदीनवास्त्रवो क्लेशे' इत्यमरः।

अनायिम्ह—(आनैषिष्म) आ + √नी + लुङ्, उत्त॰ बहु॰ आनयाम आनायितवन्तः।

आनुभावेन—(आनुभावेन) प्रभावेन

आपज्जि—(आपादि) आ + √पद + लुङ्, प्रथ॰ एक॰ आपन्नः।

आरब्भ—(आरभ्य) आ + √रभ + ल्यप् आलभ्य, उद्दिश्य।

आरभि—(आरब्ध) आ + √रभ + लुङ्, प्रथ॰ एक॰ उपाक्रमत्।

आराधे—आरोधेति (आराध्नोति) प्राप्नोति, पटिलभतीति जातकत्थवण्णना।

=आराधेय्य (आराधयेत्) न शं प्राप्नुयादिति पाश्चात्यपण्डिताः

आरोचितसञ्ञाय—(आरोचितसंज्ञया) प्रार्थितवशेन, प्रार्थनैकहेतुना।

आरोचेसुं—(आरूरुचन्त) आ + √रुच् + लुङ् + णिच्, प्रथ॰ बहु॰ व्यज्ञापयन्।

आहंसु (आहुः) √ब्रू + लट्, प्रथ॰ बहु॰ ब्रुवते। भूतार्थेऽपि। अवोचन्। 'इदं रूपं विकल्पेन आहुः' इत्येतस्य स्थाने प्रयुज्यते।

आह—(आह) ब्रूते ब्रवीति वा √ब्रू + लट्, प्रथ॰ एक॰ 'अह' इत्यस्मात् श्रौताद्धातोरिदमिति पाश्चात्यविपश्चितः।

आहरि—(आहार्षीत्) आ + √हृ + लुङ्, प्रथ॰ एक॰, आहरम्

आहरिंसु—(आहार्षिषुः) आ + √हृ + लुङ्, प्रथ॰ बहु॰ आनीतवन्तः, आनैषिषुः।

आहरित्वा—(आहृत्य) आ + √हृ + त्वा। उदाहृत्य, स्पष्टमभिधाय।

आहु—(आहुः, ब्रुवते) ब्रू धातोः संस्कृतवत् 'आह' इत्यादेशः। ब्रू + लट, प्रथ॰ बहु॰ भूतार्थेऽपि प्रयुज्यते

[इ]

इङ्घ—(अङ्ग) आमन्त्रणप्रेरणाऽनुमत्याद्यर्थकोऽयमव्ययः। 'चोदने इङ्घ हन्दाथ' इत्यभिधानप्पदीपिका।

इच्छि—(ऐषीत्) √इष + लुङ्, प्रथ॰ एक॰ इच्छति स्म।

इत्थिकुतहावभावविलासेहि—(स्त्रीकृतहावभावविलासैः) प्रमदाजनाऽभ्यस्तशृंगारचेष्टितैः

इत्तरदस्सनेन—(इत्वरदर्शनेन) क्षणिकदर्शनेन

इद्धिमा—(ऋद्धिमान्) दिव्यसिद्धिसमूहसम्पन्नः।

इस्सरो—(ईश्वरः) स्वामी, प्रभुः। 'इस्सरो सिवसामिसु' इत्यभिधानप्पदीपिका।

[उ]

उक्कण्ठितो—(उत्कण्ठितः) दुःखितः, कामवासनापीडितः।

उक्कमापेहि—(उत्क्रमय) उद्+√क्रम + लोट् + णिच्, मध्य० एक० परावर्तय।

उक्कारभूमियं—(उत्कारभूमौ)उत्कारो विष्ठा तस्य भूमौ। अशुचिस्थाने।

उक्कारो—(उत्कारः) विष्ठा 'उच्चारो मीलहमुत्कारो' इत्यभिधानप्पदीपिका।

उट्ठासि—(उदस्थात्) उद्+√स्था +लुङ् प्रथ० एक० उदतिष्ठत्, उत्थितः।

उत्तरिंसु—(उदतारिषुः) उद+√तॄ +लङ्, प्रथ० बहु०। उत्तीर्णाः।

उद्दो—(उद्रः) जलजन्तुविशेषः 'ऊदविलाव, इति प्रसिद्धः।

उद्धनं—(उद्धनं, उद्धानं, उध्मानम्) चुल्ली। 'अथोद्धनं च चुल्लीत्थि' इत्यभिधानप्पदीपिका। 'अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका' इत्यमरः।

उद्धनन्तरेसु (उद्धनान्तरेषु) उद्धनं चुल्ली तदन्तरेषु चुल्ल्यामित्यर्थः।

उद्धुमायि—(उदध्मायि) उद्+√ध्मा+लुङ्, प्र०एक० उच्छूनः।

उन्नदिंसु-(उदनादिषुः) उद्+√नद लुङ, प्रथ० बहु० महारावमराविषुः

उपकूलितो-(उपकूडितः) अवदग्धः, दग्धप्राय इत्यर्थः।

उपासको-(उपासकः) गृहस्थो बौद्धः।

उपोसथकम्मं-(उपवसथकर्म) श्रमणधर्मानुकूलमुपवासाचरणम्।

उपसथो-(उपवसथः) 'उद्देसे पातिमोक्खस्स पण्णत्तियं उपोसथो। उपवासे च अट्ठङ्गे उपोसथदिने सिया, इत्यभिधानप्पदीपिका।

उपोसथिको—(उपवसथिकः) उपवसथकर्मनिरतः पुरुषः

उप्पत्ति—(उदपप्तत्) उद् + √ पत +लुङ् प्रथ० एक० उत्पतितः, उदपतत्।

उब्भता—(उद्भृताः) उद्+√भृ + क्त, जलाद् बहिरुद्धृताः।

[ए]

एकको-(एककः), एकः, एकाकी, द्वितीयसङ्गरहितः, असहायः।

एकच्चो—(एकतरः, एकत्र, एकत्य, एकत्व) एकाकी, अन्यतरः, कश्चित्।

'अथेकाकी च एकच्चा' इत्यभिधानप्पदीपिका ।

एकवाचियं—(एकवाचिकम्) एकस्य वाचिकं वचनम् । व्यक्तिगतं मतमित्यर्थः ।

[ओ]

ओड्डेत्वा–(अवधाय, उद्धाय,अवदाय, उद्दाय) उद्—अव+धा दा + ल्यप् । प्रसार्य, न्यस्य ।

ओतप्पं—(आपत्रप्यं, औतप्यम्) लज्जाभावः, उत्तापः ।

ओतरि–(अवातरीत्)अव + √तॄ + लुङ्, प्रथ० एक० । अवतीर्णः, अवातरत् ।

ओपरज्जं–(औपराज्यम्) उपराजस्य राजप्रतिनिधिरूपशासकस्य भावः, औपराज्यं महाराजाज्ञानुवर्तिशासकत्वम् ।

ओरतो—(अवरतः) वक्तुः सम्मुखे तद्विपरीतपदं तु 'परतः' ।

ओरिम–अवरशब्दार्थो देशी 'ओर' शब्दः । तस्मादयं ओरिम शब्दः ओरिमतीरतः अस्मात् नदीतटादित्यर्थः ।

ओवदसि–(अववदसि) उपदिशसि ।

ओवादो—(अववादः) उपदेशः, अनुशासनम् । 'ओवादो चानुसिट्ठित्थि पुमवज्जेऽनुसासनं' इत्यभिधानप्पदीपिका ।

ओसीदापेस्सन्ति-(अवसादयिष्यन्ति) निमज्जयिष्यन्ति ।

ओसीदापेसि-(अवासीषदत्)अव+√सद+लुङ्+णिच्, प्रथ० एक० ।

ओहीनके–(अवहीनकान्) अव+√हा+क्त+क । अवशिष्टान्, तत्र त्यक्तान् ।

[क]

कतञ्ञुता-(कृतज्ञता) कृतस्य प्रत्युपकारेण सम्भावनम् ।

कतपरक्कमेन–(कृतपराक्रमेण विहितप्रयत्नेन, गृहीतायासेन ।

कथेसि—(अचकथत्) √कथ + लुङ्, प्रथ० एक० । अवदत् ।

कप्पको—(कल्पकः) नापितः 'कप्पको तु नहापितो' इत्यभिधानप्पदीपिका ।

कप्पो, कप्पिको–(कल्पः, कल्पिकः) कल्पः, युगः 'कप्पो काले युगे लेसे पञ्ञत्ति परमायुसु' इत्यभिधानप्पदीपिका ।

कप्पेन्तो—(कल्पयन्) √क्लृप + शतृ, प्रथ० एक० उच्छिन्दन् ।

कप्पेसि–(अचिक्लिपत्) √क्लृप + लुङ् + णिच्, प्रथ० एक० ।

कसटफलानि–(कष्टफलानि) विरसानि फलानि ।

कस्सपो–(काश्यपः) कश्यपगोत्रोत्पन्नः, गोतमतनोः पूर्वतनाभिधा वोधिसत्त्वस्य ।

कहापण–(कार्षापण) सुवर्णादिमानविशेषः मुद्राविशेषः। 'करिसापणो' इत्यपि रूपं दृश्यते ।

काकसीसो–(काकशीर्षः) वायसमस्तकानुकारिशिराः ।

कारणघरं–(कारणागृहम्) 'कारणा तु च यातना' इत्यभिधानप्पदीपिका । समासे ह्रस्वत्वम् । कारागृहम् ।

कालकण्णिसकुनो-(कालकर्णिशकुनः) दुःशकुनसूचकः पक्षी ।

कालपाषाणकूटवण्णो–(कालपाषाणकूटवर्णः; कृष्णाचलशिखराकारः।

कुमारकीलं–(कुमारक्रीडाम्) राजकुमारोचितां विषयोपभोगरूपां क्रीडां केलिम् ।

कुरंगमिगो-(कुरङ्गमृगः) हरिणजातिविशेषः'मिगो पसुकुरुङ्ग च' इत्यभिधानप्पदीपिका । जातिविशेषद्योतनेन नात्रार्थपुनरुक्तिः ।

कूटट्टकारका–(कूटार्थकारकाः) कपटपक्षोत्थापकाः, अलीकार्थोपन्यासदक्षाः ।

कूपको–(कूपकः) 'कूपस्तम्भः कूपको तु च कुम्भके' इत्यभिधानप्पदीपिका ।

कोट्ठासो–(देशीशब्दः भागः अंशः

कोसियो–(कौशिकः) उलूकः । 'उलूकिन्देसु कोसियो' इत्यभिधानप्पदीपिका ।

(ख)

खरा–(खरा) तीव्रा ।

खादापेस्सामि–(खादयिष्यामि) √खाद + लृट्, णिच् , उ० एक०

खादिंसु–(अखादिषुः) √खाद + लुङ् , प्रथ० बहु० अभक्षयन् ।

खानुको,खाणुको–(स्थाणुकः)शाखादिरहितो वृक्षः ।

खायमानं–(ख्यायमानम्) √ख्या + शानच् । मान्तं, दृश्यमानम् ।

खारिभारो–(खारी + भारः) खारीति परिमाणविशेषः भिक्षोरुपकरणविकरः।

(ग)

गंगानिवत्तने–(गङ्गा + विवर्तने) गङ्गाप्रवाहपरिवर्तनस्थले ।

गण्हितुं–(ग्रहीतुं) √ग्रह + तुमुन्

गुम्बे—(गुल्मे) स्तम्बः। 'अथ गुम्बो च थम्भस्सि' इत्यभिधानप्पदीपिका।

गोचरपसुतो–(गोचरप्रसितः)गोचर + प्र + √सी + क्त। आहारान्वेषणनिरतः।

गोचरो–(गोचरः) गोचारणस्थानं, आखेटकः, पशुग्रहणं, आहारः।

(घ)

घातयिंसु–(अजीघनन्, न्त) √हन + लुङ + णिच्, प्रथ० बहु० घातयन्ति स्म।

घातेय्यं—(घातयेयम्) √हन + विधिलिङ् + णिच्, उत्त० एक० जीवितविरहितं कुर्याम्।

घोसेसि–(अघोषीत्) घुष+लुङ् प्रथ० एक० अघोषयत्।

(च)

चम्मवरत्तं–(चर्म्मवरत्राम्) चर्मनिर्मितां पाशपट्टिकाम्।

चम्मसाटको– चर्मशाटकः) परिहितकृत्तिः 'दुस्स चोलो च साटको' इत्यभिधानप्पदीपिका।

चिण्णट्ठाने–(चीर्णस्थाने) चिरपरिचितप्रदेशे।

चित्रपेक्खुणं–(चित्रप्रेङ्खनं, चित्रपिञ्जं–पिच्छ। चित्रपक्षम्। बहुवर्णपिच्छं, शोभनगतिकम्।

चीवरवड्ढको–(चीवरवर्द्धकः) चीवरो महदुपकरणः श्रमणानाम्। तस्य वर्द्धकश्छेदकः। श्रमणधर्मविरुद्धाचार इत्यर्थः।

चीवरो–(चीवरः) काषायः।'अरहद्धजो च कासाय कासावानि च चीवरे' इत्यभिधानप्पदीपिका।

(छ)

छड्डापेसि (अचिच्छृदत्) √छृद + लङ् + णिच्, प्रथ० एक० अपातयत्, अत्याजयत्।

छड्डेतब्बभावो—(छर्दितव्यभावः) √छृद+तव्य+भावः। कार्यविरहोत्था परित्याज्यावस्था।

(ज)

जम्मो—(जाल्मः), पामरः, असमीक्ष्यकारी, 'जालमस्तु पामरे। असमीक्ष्यकारिणि च' इति हैमः।

जहापेसुं—(अजीहपन्) √हा + लुङ् + णिच्, प्रथ० बहु० अत्याजयन्।

जातिसम्भवो–(जातिसम्भवः) जन्मग्रहणम्, संसारावस्थितिः।

जातिस्सरो-(जातिस्मरः) पूर्वजन्मानुस्मरणसम्पन्नः।

जुतिन्धरा-(द्युतिधराः) कान्तिपूर्णाः। समस्तपदयोर्मध्येऽनुनासिकागमः पालिप्रभृतिषु प्राकृतभाषासु दरीदृश्यते।

जेतवनं-(जैत्रवनं) प्रसेनजित्पुत्रात् जैत्रात् क्रीत्वा अनाथपिण्डकेन बुद्धाय समर्पितं श्रावस्तीसमीपस्थं विहारोद्यानम्।

(झ)

झापेत्वा-'झा' दाहे इति देशी धातुः। ततो 'झापेति' इति णिजन्तरूपम् ततः क्त्वा। दाहं कृत्वा दग्ध्वा।

(ञ)

ञाति-(ज्ञातिः) बन्धवः। 'बन्धवो बन्धु सजनो सगोत्तो ञाति ञातको' इत्यभिधानप्पदीपिका।

ञातीहनुञ्ञाता-(ज्ञातिभिरनुज्ञातः) बन्धुभिरनुमतः।

(ठ)

ठपेसि-(अतिष्ठिपत्) √स्था+लुङ्, प्रथ० एक०, अस्थापयत्।

(त)

ततियसावनाय-(तृतीयश्रावणायां) तृतीयायांघोषणायामवसितायाम्।

तत्तकपालो-(तप्तकपालः) तप्तकर्परः 'स्यात् कर्परः कपालोऽस्त्री' इत्यमरः।

तिक्खत्तुं-(त्रिकृत्वः) त्रिवारं, वारत्रयं त्रिरावृत्य।

तित्थिये-(तैर्थिकान्) अन्यधर्मावलम्बिनः। बौद्धेतरमतानुयायिनः।

तुम्हाकं-(युष्माकम्) युष्मदः षष्ठीबहुवचने रूपम्। चतुर्थ्यर्थेऽपि प्रयुज्यते।

(थ)

थामसपन्नो-(स्थाम + सम्पन्नः) बलयुक्तः।

(द)

ददेय्यं- दद्याम्) √दा + विधिलिङ् उत्त० एक०। यच्छेयम्।

दधिवारको-(दधिवारकः) दधिपात्रं दधिकलसः।

दसबलो-(दशबलः) बुद्धः। 'बुद्धो दसबलः सत्था' इत्यभिधानप्पदीपिका।

दहरो-(दहरः) युवा। 'दहरो च युवा सुसु' इत्यभिधानप्पदीपिका।

दिट्ठो-(द्विष्टः) शत्रुः, द्वेष्टा' विद्देसी च दिसो दिट्ठो' इत्यभिधानप्पदीपिका।

दिसाकाका-(दिशाकाकः) दिशापरिज्ञानाय पोतेषु परिपालितो

वायसः।

दिसापामोक्खो—(दिशाप्रामुख्यः, दशाप्रामुखः) दिशासु प्रामुख्यं यस्य, प्रमुख एव प्रामुखः स वा। सर्वासु दिक्षु प्रसिद्धः।

दीपिनो—(द्वीपिनः) व्याघ्रस्य। 'सद्दुलो दीपिनीरितो' इत्यभिधानप्पदीपिका।

दुब्बचो—(दुर्वचाः) दुष्टवाक्, प्रतिनिविष्टचित्तः, यथेच्छाचारी।

दुमगम्हा-(द्रुमाग्रात्) वृक्षशाखाग्रभागात्।

दुस्सं-बहुविवादास्पदमस्य पदस्य व्याख्यानम्। जातकत्थवण्णनाकारो दुस्स' इति पठित्वा 'अमुस्स' इति पर्यायं ददाति। 'दुस्सं' इति पाठो वरीयानिति मत्वा दूषणीयमिति तदर्थं तदन्ये बहवो मन्यन्ते।

दूसयि-(अदूदुषत्)√दुष + लुङ्+णिच् प्रथ० एक० अनाशयदित्यर्थः।

देवसंखलिकाय—(देवशृङ्खलिकया) मायामय्या बन्धनरज्ज्वा।

देसनं—(देशनं) उपदेशः।

दोमनस्सप्पत्तो—(दौर्मनस्यप्राप्तः) विषण्णः।

दोहलो-(दोहदः) गर्भिण्या अभिलाषः

द्विन्नं—(द्वाभ्यां, द्वयोः) द्विशब्दस्य षष्ठ्यन्तं रूपम्। चतुर्थ्यभावात् पालिभाषायां तदर्थेऽपि प्रयुज्यते।

(ध)

धम्मराजा—(धर्मराजः) न्यायपरायणो नृपः। सत्यनिष्ठः। भगवतो बुद्धस्य विशेषणपदम्। 'नवहि लोकुत्तरधम्मेहि परिसं रञ्जेतीति धम्मराजा' इति जातकत्थवण्णना।

धम्मो—(धर्मराजः) 'धम्मो सभावे परियत्तिपञ्ञा ञायेसु सच्चप्पकतीसु पुञ्ञे। ञेय्ये गुणाचारसमाधिसूपि निस्सत्ततापत्तिसु कारणादो' इत्यभिधानप्पदीपिका।

धातु—'सेम्हादो रसरत्तादो महाभूते पभादिके। धातु द्वीस्वट्ठि चक्खादि भवादी गेरिकादिसु' इत्यभिधानप्पदीपिका।

धीतरं—(दुहितरं) पुत्रीम्।

(न)

नयिसु—(अनैषिषुः) √नी + लुङ्, प्रथ० बहु० अनयन्, नीतवन्तः।

नासिस्स-(अनशिष्यत, अनंक्ष्यत) √नश + लृङ्, प्रथ० एक० नष्टोऽभविष्यत्।

निकति—(निकृतिः) कैतव, शाठ्यं 'थियं निकति कूटं च दंभो सठ्यं च केतवं' इत्यभिधानप्पदीपिका।

निकतिप्पञ्ञो-(निकृतिप्रज्ञः)निकृति-र्वंञ्चना शाठ्यं वा तत्र प्रज्ञा बुद्धिः प्रवृतिर्यस्य स कपटपटुः, शाठ्यनिष्ठः।

निक्खन्तकालतो-(निष्क्रान्तकालतः) निष्क्रमणसमयादारम्भ।

निक्खमि-(निरक्र-क्रा-मीत्) निर्+क्रम+लुङ्, प्रथ० एक०। निष्क्रान्तः निरगच्छत्।

निपज्जापेत्वा-(निपाद्य)नि+√पद+णिच्+क्त्वा। शाययित्वा।

निपज्जि-(न्यपादि) नि+√पद+लुङ्, प्रथ० एक०।

निब्बत्ति-(न्यवृतत)नि+√वृत+लुङ्, प्रथ० एक०। पुनः प्रादुर्भूय, पुनर्जन्माऽऽददे।

निब्बत्तित्वा-(निर्वर्त्य) नि+√वृत+ल्यप्। पुनरागत्य, जनुरादायेत्यर्थः।

निय्यादेत्वा-(निर्यात्य)निर्+√यत्+णिच्+ल्यप्। प्रतिग्राह्य, प्रत्येण, आवयोस्तस्याः अवेक्षणभारं न्यस्येत्यर्थः।

निय्यामकसुत्तं-(निर्यामकसूत्रं) पोतवाहकानां नौविद्या, नाविकागमः

निय्यामको } (निर्यामक नियामकः)
नियामको }

पोतवाहः,नौपरिचालनाधिकृतः पुरुषः। 'नियामकोपोतवाहे'इत्यभिदानप्पदीपिका

निसिन्नकाले-(निषण्ण+काले) उपवेशनसमये।

निसीदि-(न्यसदत्) नि+√सद्+लुङ्, प्रथ० एक०। निषण्णः, न्यसीदत्, निषेदिवान्।

निस्साय—(निःश्रित्य) आश्रित्य।

नीहरि—(न्यहार्षीत्)नि+√हृ+लुङ्, प्रथ० एक०। निरहरत्, निहृतवान्।

[प]

पकतिसमुद्दपिट्ठे—(प्रकृतिसमुद्रपृष्ठे) वास्तविकपारावारवारीणामुपरि। प्रत्यक्षजलराशौ।

पक्कमिंसु-(प्राक्रमिषुः) प्र+√क्रम+लुङ्, प्रथ० बहु०। प्राद्रवन्।

पक्कामि-(प्रक्रामीत्) प्र√क्रम++लुङ्, प्रथ० एक० प्राचलत्।

पक्कोसापेसि-(प्राचुक्रुशत्-त)प्र+√क्रुश+लुङ्+णिच्, प्रथ० एक० आकारयत्।

पक्कोसि-(प्राक्रुशत्) प्र + √क्रुश + लुङ् + णिच्, प्रथ० एक०। आहूतवान्

पक्खन्दिंसु--(प्रास्कन्दिषुः) प्र+√स्कन्द+लुङ्, प्रथ० बहु०। उदगच्छन्, निरीयुः।

पक्खिप--(प्राक्षेप्सीत्) प्र + √क्षिप +लुङ्, प्रथ० एक०। प्राक्षिपत्

पग्घरन्तेन—(प्रघरता) प्र+√घृ + शतृ, तृ० ए०। प्रस्रवता, प्रक्षरता।

पचापेतुं-(पाचयितुम्) √पच + णिच् + तुमुन्। पक्वं कर्तुम्। अग्निसिद्धं विधातुम्।

पच्चामित्तो-(प्रत्यमित्रं)शत्रुः। 'पच्चामित्तो विपक्खो च' इत्यभिधानप्पदीपिका

पच्चूसकाले-(प्रत्यूषकाले) प्रभातसमये।

पच्चूसो—(प्रत्यूषः, प्रत्यूषं, प्रत्यूसस्) प्रभातम् 'प्रभातं च विभातं च पच्चूसो कल्लमप्यथ' इत्यभिधानप्पदीपिका।

पच्छावामनक-धातुको-(पश्चाद्वामनकधातुकः) पृष्ठभागे कुरूपोपपन्नः। पृष्ठपादाभ्यां खञ्जः।

पच्छिज्ज--(प्राच्छित्त) प्र + √छिद + लुङ्, प्रथ० एक०। प्राच्छिद्यत, विच्छिन्नः।

पज्झायन्ता--(प्रध्यायन्)प्र + √ध्यै + शतृ प्र० एक०। विचारयन्, चिन्ताकुलः।

पञ्चङ्गुलिकं-(पञ्चाङ्गुलिकम्)पञ्चभिरङ्गुलीभिः कृत चिह्नम्।

पञ्ञा—(प्रज्ञा) बुद्धिः।

पञ्ञापारमि-(प्रज्ञापारमिताम्) सम्पूर्णज्ञानसिद्धिम्। दशगुणा हि पारमिता, तत्र प्रज्ञा तदन्यतमा।

पटिच्छादेत्वा-(प्रतिच्छाद्य)प्रति+√छद् + णिच् + ल्यप्। प्रावृत्य

पटिसन्थारो-(प्रतिसंस्तारः) आलापः, सम्भाषणम्।

पटिसन्धि-(प्रतिसंधिम्) पुनर्जन्म।

पटिसुणित्वा-(प्रतिश्रुत्य) प्रतिज्ञाय, स्वीकृत्य।

पटिजग्गि-(प्रत्यग्रहीत्) प्रति + √ग्रह +लुङ्, प्रथ० एक०। प्रतिगृहीतवान्, स्वीकृतवान्।

पटिच्छापेत्वा-(प्रत्येष्य)प्रति + √इष + णिच् + क्त्वा। प्रतिग्राह्य,तस्यां तयो रक्षाभारं न्यस्येत्यर्थः।

पठमकप्पिकतो—[प्रथमकल्पकतः] आदियुगादारभ्य।

पण्डुकम्बलसिलासनं-(पाण्डुकम्बलशिलासनम्) पाण्डुकम्बलो नाम प्रस्तरविशेषः । तेनैव निर्मितं शक्रस्यासनमिति बौद्धकथाकाराः । 'एरावणो गजी पण्डुकम्बलो तु सिलासनं' इत्यभिधानप्पदीपिका ।

पतनाकारप्पत्ता- (पतनाकारप्राप्तः) वरत्राकर्तनायासेन शिथिलितवन्धनत्वात् पतनोन्मुखा जाताः ।

पतिट्ठा-(प्रतिष्ठा) आश्रयः स्थानम् । 'पतिट्ठा निस्सये ठाने' इत्यभिधानप्पदीपिका ।

पतिट्ठापेत्वा-(प्रतिष्ठाप्य प्रति + √स्था + णिच् + ल्यप् । स्थापयित्वा, निधायेत्यर्थः ।

पतिट्ठापेसि—(प्रातिष्ठापत्)प्र + √स्था+ लुङ्, + णिच्, प्रथ० एक० । प्रत्यस्थापयत् ।

पत्ति—(प्राप्तिः) लाभः ।

पदरानि—(प्रदराणि) फलकानि । 'फलको फलकं भङ्गं पबुद्धदरियम्पि चं' इत्यभिधानप्पदीपिका । फलकार्थे तु नपुंसकमेव दृश्यते ।

पनेत, पणेत, पणीत—पणीतम्)प्र+ ∠नी+क्त । कृतम् ।

पप्पोठत्वा-(प्रस्फोट्य) प्र+ √स्फुट+ल्यप् । विधूय ।

पब्बतरसो—(पर्वतरसः) पर्वतः शैलस्तद्रसो द्रवः, शैलेयद्रवः ।

पभङ्करो—(प्रभाकरः) तेजोमयः, सूर्यः । भगवतो बुद्धस्य विशेषणपदम् । 'सत्तलोकसङ्खारलोकेसु आलोकस्स कतत्ता' इति जातकत्थवण्णना ।

परक्कमो—(पराक्रमः) व्यायामः, आयासः प्रयत्नः 'वायामो च परक्कमो' इत्यभिधानप्पदीपिका ।

परिक्खारदानं—(परिष्कारदानम्) चीवरादि भिक्षुजनापेक्षितं वस्तु परिष्कारस्तस्य दानम् ।

परिक्खारो—(परिष्कारः), परिवारः संभारः उपकरणं, विभूषणम् । 'परिवारे परिक्खारो संभारे च विभूसने' इत्यभिधानप्पदीपिका ।

परिगण्हि—(पर्यग्रहीत्) परि√ग्रह +लुङ्, प्रथ० एक० । पर्यगृह्णात्, आलिङ्गत् ।

परित्तं—(प्ररिक्तम्) प्र+√रिच + क्त । अल्पकम् । 'परित्तो तीसु अप्पके' इत्यभिधानप्पदीपिका ।

परिनिब्बायि—(परिन्यवासीत्) परि +वि + √वा+लुङ्, प्रथ०

एक० । निर्वाणं प्राप्नोत् ।

परिसक्कनं–(परिशकनं) 'शकमर्षणे' इत्यस्मात् धातोरिदं रूपम् । प्रयतनं, उद्योग: ।

परिहायि–(पर्यहायि) परि+√हा +लुङ्, कर्मणि प्रथ० एक० । पर्यहीयत, परिक्षीण:, नष्ट: ।

परिहार:—त्याग:, मोक्ष: 'वज्जने परिहारो च सक्कारे चेव रक्खने ।' इत्यभिधानप्पदीपिका ।

पलायि–(पलायिष्ट) परा+√अय लुङ्, प्रथ० एक० । पलायित:, अद्रवत् ।

पल्लंकेन—(पर्यङ्केन) पद्मासनमास्थाय

पसिब्बको:—(प्रसेवक:, प्रसीव्यक:) चिन्त्यैवास्य निरुक्ति: । 'ककुभस्तु प्रसेवक:' इत्यमरोक्त दिशा प्रसेवकस्तु वीणाया दारुभाण्डम् । तदाकारो रज्ज्वादिभी रचितोऽवलम्बक: । 'झोला''थैला''सिखहरा'दि रूप: ।

पस्सेय्यासि—(पश्ये:)√दृश+ विधिलिङ्, मध्य० एक० । अवलोकये: ।

पहरि—(प्राहरीत्) प्र+√हृ+ लुङ्, प्रथ० एक० । प्राहरत्, प्रहारं कृतवान् ।

पहटो—(प्रहत:) प्र+√हन+क्त । प्रहारं प्राप्त: ।

पाचीनलोकधातुतो—(प्राचीनलोक-धातुत:) पूर्वदिशामूलत: ।

पाणका—(प्राणका:) प्राणा:, कीटा: 'कीटो तु पुलवो किमि पाणको' इत्यभिधानप्पदीपिका ।

पाणातिपात:-(प्राणातिपात:) प्राणो-त्क्रमणम्, प्राणपरित्याग: ।

पानियतित्थे—(पानीयतीर्थे) जलाव-तारे : 'गुरुपाय:वतारेसु तित्थं' इत्यभिधानप्पदीपिका ।

पापुणि—(प्रापम्) प्र+√आप+ लुङ्, उत्त० एक० । अलभे, अविन्दम् ।

पापुणिंसु—(प्रापन्) प्र+√आप लुङ्, प्रथ० बहु० । प्राप्नुवन्, प्राप्तवन्त: ।

पाविसि—(प्राविक्षत्) प्र+√विश +लुङ्, प्रथ० एक० । प्राविशत्, प्रविष्ट: ।

पायासि—(प्रायासीत्) प्र+√या+ लुङ्, प्रथ० एक० ।

पायिंसु—(प्रायासिषु:) प्र+√या+ लुङ्, प्रथ० बहु० । प्रयाता: ।

पारुपित्वा–(पावृत्य) प्र+आ+√

वृ + क्त्वा। छादयित्वा।

पिलन्धःपेत्वा-(पिनह्य अपि + √ नह + ल्यप्।

पिलन्धो √ पिनद्धः,

पिलन्धति √ पिनद्धयति।

पासादिको-(प्रासादिकः) दयालुः, मधुरस्वभावः, मनोज्ञः।

पिट्ठिपासाणो-(पृष्ठपाषाणः) महाप्रस्तरशिखरः।

पियीयिंसु-(प्यधायिषातां, प्यधायिषत वा) अपि+√धा+लुङ् कर्मणि, प्रथ० बहु०। न्यमील्येतां न्यमील्यन्त वा।

पियमातुलको-(प्रियमातुलकः) प्रियो मातुलो यस्य सः। स्वार्थे कप्रत्ययः।

पियायमाना-(प्रियायमाना) प्रीतिभावं प्रदर्शयन्ती।

पुग्गलो-(पुद्गलः) जीवः 'पाणो सरीरि भूतं वा सत्तो देही च पुग्गलो। जीवो पाणि पजा जन्तु जनो लोको तथागतो' इत्यभिधानप्पदीपिका।

पुच्छिंसु-(अप्राक्षुः) √ पृष + लुङ् प्रथ० बहु०। पृच्छामकार्षुः, अनुयुक्तवन्तः।

पुरेद्वारेण-पुरोद्वारेण)पुरस्थितेन द्वारेण

पूरयित्थ-(अपूपुरत) √पूर + लुङ्, प्रथ० एक०। पूरिता, पूर्यते स्म।

पेक्खुणानि-(प्रेङ्खणानि, पिञ्जानि (पिच्छानि) गतयः, पिच्छभारः।

पेसेसि-(पैषिषत्) प्र+√इष + लुङ् + णिच्, प्रथ०एक० प्रेषितवान्, प्राहिणोत्।

(फ)

फालेत्वा-(फल + णिच्, + क्त्वा) भङ्क्त्वा, त्रोटयित्वा।

(ब)

बज्झेत्वा—बद्धो भूत्वा।

बज्झेति = बद्धयते

बद्धरावं—बद्धस्य पाशगृहीतस्य राव, परिदेवनं, जालावरुद्धचेष्टस्य क्रन्दनमित्यर्थः।

बद्धिंसु—(अभान्त्सुः) = बध + लुङ्. प्रथ० बहु०। बद्धवन्तः अबध्नन्।

बलाहस्स-(बलाहाश्वः बलाहो मेघस्तद्वदश्वो, आकाशोड्डयनसमर्थो घोटकः।

बावेरु-बावेरु नाम राष्ट्रम्। 'बैबिलन' इति केचित्।

बोधिसत्तो-(बोधिसत्त्वः), बोधिः सम्यग् ज्ञानं, तदवाप्तये निर्दिष्टचरः, भविष्यद्बुद्धः।

वोन्दि—शरीरम्, 'सरीरं वपु गत्तं चात्तभावो वोन्दि विग्गहो' इत्यभिधानप्पदीपिका ।

बद्धपरिसा—(बुद्धपरिषत्)बौद्ध-समाजः तथोक्तमभिधावप्पदीपिकायाम्— 'चतस्सो परिसा भिक्खु भिक्खुनी च उपासका । उपासिका यो ति इमाथवाट्ठपरिसासियुं । तावतिंस द्विजक्खत्त मारगहपतिस्स च । समणानं वसा चातुम्महाराजिकब्रह्मुनं ।

ब्रम्हचरियं—(ब्रह्मचर्यम्) मैथुनाऽरतिः । 'ब्रम्हचरिय अप्पमञ्ञासु सासने । मेथुनाऽरतियं वेय्यावच्चे सदारतुट्ठियं' इत्यभिधानप्पदीपिका ।

(भ)

भत्तं—(भक्तम्) ओदनः । 'ओदनो वा कुरं भत्त' इत्यभिधानप्पदीपिका ।

भत्तकिच्चावसाने—(भक्तकृत्यावसाने) भोजनकर्मणोऽनन्तरम् ।

भरिया—(भार्या) जाया ।

भरुरट्ठं—(भरुराष्ट्रम्) 'भडोंचे'ति संप्रति प्रसिद्धगुर्जरदेशे नगरम् ।

भविस्स—(अभविष्यत्)√भू + लृङ्, प्रथ० एक ।

भवेय्य—(भवेत)√भू + लिङ्, प्रथ० एक० ।

भस्सि—(अभ्रशत्)√भ्रंश + लुङ्, प्रथ० एक० । न्यपतत्, प्राविशत् ।

भावितभावनाय—(भावितभावनया) भाविता वर्द्धिता सिद्धा भावना ध्यानं तथा । सिद्धावधानशक्त्या ।

भिज्जिस्साम—(भेत्स्यामहे)√भिद् + लट् (कर्मणि), उत्त० बहु० । विनाशं प्राप्ता भविष्यामः ।

(म)

मङ्गलहत्थी—(मङ्गलहस्ती) राजकीयो गजः । दशविधानां गजानामन्यतमो वा । तदुक्तम्—
कालालकं गंगेय्या पण्डर तम्बा च सिंगलो गन्धो । मङ्गल हेमापोसथ छद्दन्ता गजकुलानि एतानि ॥

मञ्जु भाणि—(मञ्जुभाणिनः) मञ्जु + √भण + इनि । मधुरस्वरस्य

मतकभत्त—(मृतकभक्त) मृतकस्यार्थे यत् तन्मृत्युतिथौ दीयते तत् । भक्तमितिभोजनीयवस्तुनि प्रयुक्तम

मन्तयिंसु—(अममन्त्रन्त) √मन्त्र + लुङ् प्रथ० बहु० । व्यचारयन्, परस्परविचारविनिमयं चक्रुः ।

मरि—(अमृत) मृ + लुङ्, प्रथ०

एक० । प्राणैर्वियुयुजे ।

महारज्ज-(महाराज्यम्) महाराजस्य सर्वतन्त्रस्वतन्त्रस्य शासितुर्भावः, साम्राज्यमित्यर्थः ।

मातुगामो-(मातृग्रामः) स्त्रीजनः, ललनासार्थः ।

मापेत्वा-(मापयित्वा)√मा+णिच् +क्त्वा । दैवबलेनोत्पाद्य ।

मा मरिंसु-(मा मृषत)√मृ+लुङ् +प्रथ० बहु० । मा योगे अड-भावः । मा म्रियन्तामित्यर्थः ।

मुञ्चिसु-(अमूमुचन्त) √मुच +लुङ्, प्रथ० बहु० । मुक्त-वन्तः; अमुञ्चन् ।

मुञ्चिस्सामि-(मोक्ष्ये, मुक्तोभविष्यामि ।

मुञ्जकेसा-(मुञ्जकेशः मुञ्जोपमेय-वर्णाकारचिकुरः ।

मुम्मुरो-(मुर्मुरः) अङ्गारः, भस्म, तुषाग्निः, कुकूलः ।

(य)

यावततियं-(यावत्तृतीयं) तृतीयवारं यावत्, त्रिकृत्वः ।

(र)

रतनसासनं-(रत्नशासनम्) बुद्धो धर्मः सङ्घ इति त्रीणि रत्नानि तेषां शासनमनुशासनम्, बौद्ध-मतसर्वस्वरूपोपदेशसारः ।

रत्तिभत्तं (रात्रिभक्तम्) रात्रिभोज-नीयमोदनम्, नक्ताशनीयमन्य-दन्नम् ।

रवि-(अरावीत्)√रु+लुङ्, प्रथ० एक० । शब्दमकरोत् ।

रसो-(रसः) द्रवः, पारदः, वीर्यम् 'द्रवाचारेसु विरिये मधुरादिसु पारदे । सिंगारादो धातुभेदे किच्चे संपत्तियं रसो' इत्यभि-धानप्पदीपिका ।

राजोवादो-(राजाववादः) राजो-पदेशः, नृपानुशासनम् ।

रुक्खकोट्ठकसकुणो-(वृक्षकोष्ठकसकुनः) शतपत्राभिधः पक्षी । 'कठफोड़वा' इति प्रसिद्धः ।

रोचेसि-(अरूरुचत्) √रुच्+लुङ् +णिच्, प्रथ० एक० । अवृणोत् रुचितममन्यत ।

(ल)

लग्गि-(अलागीत्)√लग्+लुङ्, प्रथ० एक० । लग्नः, अन्वसक्तः ।

लद्धगब्भपरिहारो(लब्धगर्भपरिहारः) अधिगतगर्भवासमोक्षः, लब्धजन्मा ।

लब्भति-(लभ्यते)√लभ+लट् कर्मणि । प्राप्यते ।

लभामसे— (लभेमहि) √लभ+लट्, उत्त॰ बहु॰ एकवचनार्थे बहुवचनम् लभे इत्यर्थः।

लभिं—(अलभे) √लभ+लुङ्, प्रथ॰ एक॰। अविन्दम्।

लुद्दको—(लब्धकः) व्याधः। लुब्ध आकांक्षिणि व्याधे' इति हेमः।

लुद्दानि—(रुद्राणि) रुद्रकर्माणि, नृशंसकार्याणि।

लोकसन्निवासो—(लोकसन्निवासः) जनसमूहः।

लोहितमक्खितं—(लोहितम्रक्षितम्) लोहितं रुधिरं तेन म्रक्षितं संयुक्तम् शोणिताप्लुतम्।

(व)

वञ्चेसिं—(अवावञ्च)अव+√वञ्च+लुङ्, उत्त॰ एक॰।

वण्णेन--वर्णेन) रूपेण, संस्थानेन। 'वण्णो सण्ठानरूपेसु' इत्यभिधानप्पदीपिका।

वण्णेसि—(अववर्णत्-त) √वर्ण+लुङ्, प्रथ॰ एक॰।

वदेय्युं—(वदेयुः) √वद+विधिलिङ्, प्रथ॰ बहु॰। कथयेयुः।

वद्धमयं—(वध्रमयम्) चर्मनिर्मितम्।

वयप्पत्तो—(वयःप्राप्तः) अधिगतवयाः, उपागतविवाहावस्थः।

वरत्ता—(वरत्रा) पट्टिका 'वरत्ता, वट्टिका नन्धि' इत्यभिधानप्पदीपिका।

वलञ्जो—(अवलञ्जो त्रिन्त्यनिरुक्तिकमिदं पदम्। चिन्हं, उपयोगः। दैनिको व्ययः।

वसि—(अवात्सीत्) √वस+लुङ्, प्रथ॰ एक॰। अवसत्।

वसिंसु—(अवात्सिषुः) √वस+लुङ्, प्रथ॰ बहु॰, अवसन्।

वस्सापेस्सामि—(वर्षयिष्यामि) √वृष+लट्+णिच्, उत्त॰ एक॰। वर्षणं कारयिष्यामि।

वास्सित्वा—(वाशित्वा) 'वाश' शब्दे इत्यस्मात् रूपमिदम्। √वाश+क्त्वा। शब्दं कृत्वा।

वहिद्धासमुट्ठानं— (बहिःसमुत्थाना) बाह्योद्भवा।

वारको—(वारकः) पात्रम, कलसः। 'कुम्भो कलसवारका' इत्यभिधानप्पदीपिका।

वारेसि—(आवारीत्) √वृ+लुङ्+प्रथ॰ एक॰। अवृणोत्। वृतवती।

वालिसिको-(वाडिशकः) मत्स्यग्राही, मत्स्योपजीवी।

विकालो—(विकालः) अपराह्णं, सा-

याह्नं, विपरीतकालः।

विचरेसि—(व्यचारीत्) वि + √ चर + लुङ् + णिच्, प्रथ० एक०। व्यचारयत्, व्यरचत्, अरक्षत्।

वित्तिण्णा-(विस्तीर्णा) दूरप्रसारितवारिविस्तारा।

विनिच्छिनिसु—(विनिरचैषिषुः, विविरचेषिषत) वि + √ निर् + चि + लुङ्, प्रथ० बहु० विनिश्चयं कृतवन्तः न्यायनिर्णयं व्यदधुः।

विनिच्छयो—(विनिश्चयः, व्यवहारनिर्णयः, न्यायालय., सत्पक्षपरिग्रहः।

विनासप्पच्चयो—(विनाशप्रत्ययः) संहारकारणम्।

विप्पनट्ठाय-(विप्रनष्टया) विप्र + √ नश + क्त। प्रक्रान्तया चलितया। 'पक्कान्ताय' इति जातकत्थवण्णना

विसज्जेसि—(व्यसर्क्षीत्) वि + √ सृज + लुङ्, प्रथ० एक०। अत्यजत्, अमुञ्चत्।

वीमंसामि—(विमृशामि) परीक्षे। एतदधिकृत्य विवदन्ते विपश्चितः। 'विमीमांसे' इत्यस्मादिति केचित्। सन्नन्तान् मनधातोरिदमिति पालिवैयाकरणाः। विमृशामीत्यस्मादिवमिति ट्रेङ्कनर-प्रभृतयः पाश्चात्यपण्डिताः।

व्याममत्तानि-(व्याममात्राणि) अतिदीर्घानि। 'व्यामो सहकरा बाहुद्वेपस्स द्वय वित्यता' इत्यभिधानप्पदीपिका।

वेमज्झे—(विमध्ये) नदिया वेमज्झे नदीतटादविदूरे इत्यर्थः।

वेहासंगमो—(विहायोगमः) आकाशवर्त्मना संचरितुं समर्थः।

वोहारकरणत्थाय-(व्यवहारकरणार्थाय) किमपि कार्यं सम्पादयितुमित्यर्थः।

वोहारो—(व्यवहारः) वाणिज्यं, 'वोहारो सद्द पण्णति वणिजा चेतनासु च' इत्यभिधानप्पदीपिका।

[स]

संवच्छरमत्थके—(संवत्सरमस्तके) वर्षादूर्ध्वमित्यर्थः।

सक्खि—(अशकत्) √शक + लुङ्, प्रथ० एक०।

सक्खिस्साम—(शक्ष्यामः) √शक + लृट, उ० बहु०।

सचे—चेत् 'स' पूर्वत्वं पालिवैशिष्ट्यम्।

सच्चकिरिया—(सत्यक्रिया) आत्मनः शीलं प्रतिष्ठाय गृहीतः शपथः।

सच्चूपसंहितं—(सत्योपसंहितम्, सत्य-

पूर्णम्, यथार्थम् यथाभूतम्।

सञ्ञी—(संज्ञी) संज्ञाबोधः, विश्वास इति यावत्, तद्युक्तः।

सणिकं—शनकैः, शनैः।

सतपत्तो—(शतपत्रः) पक्षिविशेषः 'कठफोड़वा' इति ख्यातः। 'सतपत्तो खगन्तरे' इत्यभिधानप्पदीपिका।

सत्ति—(शक्तिः) क्षुरिका, कुन्तः। क्षुरिका 'सत्त्यसिपुत्ति' इति 'सत्यादि सत्थभेदाथ' इति चाभिधानप्पदीपिका।

सत्था—(शास्ता) बुद्धः। 'मुनीन्द्रः श्रीघनः शास्ता' इत्यमरः।

सद्दहित्वा—श्रद्धाय।

सन्तिकं—(अन्तिकं) समीपम्। साधिकत्वं पालिवैशिष्टलम्।

सन्निपतिंसु—(संन्यपतन्) सं+नि+√पत+लुङ्, प्रथ० बहु०। एकत्र समवेता अभूवन्।

सन्निपातापेसि—(सन्यपीपतत्त) सं +नि+√पत+लुङ्+णिच् प्रथ० एक०। समागमयत्, आहूतवान्, आःकारयत्।

सपजापतिको-(सप्रजापतिकः) सभार्यः 'पजापति दारे ब्रम्हे मारे सुरे पुमे' इत्यभिधानप्पदीपिका।

सब्बसेतो—(सर्वश्वेतः) सर्वावयवेषु सितवर्णः वर्णान्तरानन्तरितसितिम्नोपलक्षितः

सन्थवो—(संस्तयः) परिचयः। 'सन्थवो तु परिचयो' इत्यभिधानप्पदीपिका।

सन्निपति-(संन्यपसत्)सं+नि+√पत्+लुङ्, प्रथ० एक०। समागमत्।

समणधम्मो—(श्रमणधर्मः) श्रमणो बौद्धभिक्षुः। तेन पालनीयो धर्म आचारः, भिक्षुजनोचिताचारः।

समणो—(श्रमणः) तापसः, भिक्षुः 'तपस्सी भिक्खु समणो' इत्यभिधानप्पदीपिका।

समस्सासेत्वा-(समाश्वास्य) सं+आ +√श्वस्+णिच्+ल्यप्। सम्बोधनं विधाय।

समोधानेसि-(समवादीधपत्) सं+√धा+णिच, प्रथ०एक०। समाधानं व्यधात्।

सम्पटिच्छित्वा-(संप्रतीष्य) सं+ प्रति+√इष+क्त्वा। स्वीकृत्य।

सम्मासम्बुद्धा—(सम्यक्सम्बुद्धः) पूर्णज्ञानोपपन्नः इदं शाक्यमुनेः विशेषणपदम्।

सम्मुखचिण्णेन-(सम्मुखचीर्णेन)

सम्मुखं समक्षं कृतेन गुणेनेति शेषः ।

सरणानि-(शरणानि) बुद्धो धर्मः सङ्घश्चेति त्रयाणां शरणानि ।

सरसम्पन्नो-(स्वरसम्पन्नः) मधुरस्वरयुक्तः ब्रम्हस्सरेन समन्नागतो' इति जातकत्थवण्णना ।

ससलक्खनं-(शशलक्षणम्) शशाकारं चिह्नम् ।

सहस्सं—(सहास्रं, सहस्रं) साधु, शतदशकम् ।

सावना—(श्रावणा) घोषणा ।

सावेन्तस्स—(श्रावयतः) श्रावणां कुर्वतः ।

सावेसि—(अशुश्रवत्-त) अश्रावयत् ।

सीलानिसंसो-(शीलानिशंसः) 'आनिशंसः प्रशंसनम् ।' शीलस्य सदाचारस्य प्रशंसा ।

सुंसुमारो—(शिशुमारः) नक्रः, मकरः ।

सुत्तं—(सूत्रम्) 'सुत्तं पवचने सिद्धे तन्ते तं सुपिने तिसु' इत्यभिधानप्पदीपिका ।

सुसिररुक्खेन—(सुषिरवृक्षेण) छिद्रपूर्णेन शाखिना । 'सच्छिद्दे सुसिरं तिसु' इत्यभिधानप्पदीपिका ।

सोतापन्नो—(स्रोतापन्नः) स्रोतस्+आपन्नः । प्रविष्टबौद्धधर्मः । अयं प्रथमावस्थः, द्वितीयः 'सकदागामि' तृतीया 'अनागामी , चतुर्थो 'अरहत्'

सोत्थिभावो- स्वस्तिभावः) कल्याणं, श्रेयः ।

सोब्भो—(श्वभ्रः) आवटः, गर्तः ।

सोभग्गप्पत्तो—(सौभाग्य+प्राप्तः) लब्धसौख्यः उपचितशरीरसौष्ठवः ।

सोमनस्सजातो—(सौमनस्यजातः) प्रसन्नतां गतः ।

[ह]

हिरोतप्पं-(ह्र्यापत्रप्यं, ह्र्यौपतप्यम्) लज्जाभावम्, लज्जोपतापः ।

इति पालिपाठपदोच्चयः।

———

पुस्तक-प्राप्तिस्थानम्—

मेसर्स खेलाड़ीलाल संकठाप्रसाद

के. ६१।८२, बुलानाला,

वाराणसी—१

राष्ट्रगीत

जन गण मन अधिनायक जय हे, भारत भाग्य विधाता
पञ्जाब सिन्ध गुजरात मराठा, द्राविड़ उत्कल बङ्ग,
विन्ध्य हिमाचल यमुना गङ्गा, उच्छल जलधि तरङ्ग
तव शुभ नामे जागे, तव शुभ आशिस माँगे, गाहे तव जय गाथा,
जन गण मंगलदायक जय हे, भारत भाग्य विधाता
जय हे, जय हे, जय हे; जय, जय, जय, जय हे।

पुस्तक प्राप्ति स्थानम्—
मेसर्स खेलाड़ीलाल, संकठा प्रसाद
के० ६१/८२
बुलानाला, वाराणसी—१